

ओं तत्सत्
अथ
शिवसूत्रवार्तिक - सूत्रपाठ :

प्रथमे प्रकाशे

१. चैतन्यमात्मा - Metaphysics.
२. ज्ञानं बन्धः - "
३. योनिवर्गः कलाशरीरम् - "
४. ज्ञानाधिष्ठानं मातृका - Epistemology.
५. उद्यमो भैरवः . Yoga.
६. शक्तिचक्रसंधाने विश्वसंहारः - Yoga.
७. जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभवः - Pantheism
८. ज्ञानं जाग्रत् - "
९. स्वप्नो विकल्पाः - "
१०. अविवेको मायासौषुप्तम् - "
११. त्रितयभोक्ता वीरेशः - Yoga.
१२. विस्मयो योगभूमिकाः - Theism.
१३. इच्छा शक्तिरुमा कुमारी - Pantheism.
१४. दृश्यं शरीरम्
१५. हृदये चित्तसंघट्टाद्दृश्यस्वापदर्शनम् -
१६. शुद्धतत्त्वसंधानाद्वा
१७. स्वपदशक्ति
१८. वितर्क आत्मज्ञानम्
१९. लोकानन्दः समाधिसुखम् - दृष्टि:
२०. शक्तिसंधाने शरीरोत्पत्तिः
२१. भूतसंधान - भूतपृथक्त्व - विश्वसंघट्टाः
२२. शुद्धविद्योदयाच्चक्रेशत्वसिद्धिः
२३. महाह्रदानुसंधानान्मन्त्रवीर्यानुभवः

२ये प्रकाशे

१. चित्तं मन्त्रः
२. प्रयत्नः साधकः — Yoga
३. विद्याशरीरसत्ता मन्त्ररहस्यम्
४. गर्भे चित्तविकासोऽविशिष्टविद्यास्वप्नः
५. विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था — Yoga
६. गुरुरुपायः — ''
७. मातृकाचक्रसंबोधः — ''
८. शरीरं हविः — ''
९. ज्ञानमन्नम्
१०. विद्यासंहारे तदुत्थस्वप्नदर्शनम् — ~~Removal of ignorance~~ After the abolition of vidya [illegible]

३ये प्रकाशे

१. आत्मा चित्तम्
२. ज्ञानं बन्धः — Philosophy
३. कलादीनां तत्त्वानामविवेको माया — ''
४. शरीरे संहारः कलानाम्
५. नाडीसंहार - भूतजय - भूतकैवल्य - भूतपृथक्त्वानि
६. मोहावरणात्सिद्धिः — Philosophy.
७. मोहजयादनन्ताभोगात्सहजविद्याजयः — ''
८. जाग्रद्द्वितीयकरः
९. नर्तक आत्मा — Philosophy
१०. रङ्गोऽन्तरात्मा — ''
११. प्रेक्षकाणीन्द्रियाणि — ''
१२. धीवशात्सत्त्वसिद्धिः
१३. सिद्धः स्वतन्त्रभावः — Philosophy.
१४. यथा तत्र तथान्यत्र

~~१२. धीवशात्सत्त्वसिद्धिः~~
~~१३. सिद्धः स्वतन्त्रभावः~~ — Philosophy.
१४

५४ ख १५. विसर्गस्वाभाव्याद्बहिः स्थितेस्तत्स्थितिः
१६. बीजावधानम्
१७. आसनस्थः सुखं ह्रदे निमज्जति — Yoga
१८. स्वमात्रानिर्माणमापादयति
१९. विद्याविनाशे जन्मविनाशः
२०. कवर्गादिषु माहेश्वर्याद्याः पशुमातरः
२१. त्रिषु चतुर्थं तैलवदासेच्यम्
२२. मग्नः स्वचित्तेन प्रविशेत्
२३. मध्येऽवरप्रसवः
२४. प्राणसमाचारे समदर्शनम् — outlook
२५. मात्रास्वप्रत्ययसंधाने नष्टस्य पुनरुत्थानम्
२६. शिवतुल्यो जायते — Jivanmukta
२७. शरीरवृत्तिर्व्रतम् — ''
२८. कथा जपः — ''
२९. दानमात्मज्ञानम् — ''
३०. योऽविपस्थो ज्ञाहेतुश्च — ''
३१. स्वशक्तिप्रचयोऽस्य विश्वम् — ''
३२. स्थितिलयौ — ''
३३. तत्प्रवृत्तावप्यनिरासः संवेत्तृभावात् — ''
३४. सुखासुखयोर्बहिर्मननम् — ''
३५. तद्विमुक्तस्तु केवली
३६. मोहप्रतिसंहतस्तु कर्मात्मा
३७. भेदतिरस्कारे सर्गान्तरकर्मत्वम्
३८. करणशक्तिः स्वतोऽनुभवात्
३९. त्रिपदाद्यनुप्राणनम्
४०. चित्तस्थितिवच्छरीरकरणबाह्येषु

४१. अभिलाषाद्बहिर्गतिः संवाह्यस्य
४२. तदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः -Philosophy
४३. भूतकञ्चुकी तदा विमुक्तो भूयः पतिसमः परः ,,
४४. नैसर्गिकः प्राणसम्बन्धः
४५. नासिकान्तर्मध्यसंयमात् किमत्र सव्यापसव्य-
सौषुम्नेषु
४६. भूयः स्यात्प्रतिमीलनम्

समाप्तोऽयं शिवसूत्रवार्तिकग्रन्थः

२३
२४
७६
७८

Deduct one number विसर्गस्वाभाव्याद् - is २७ not १५.

अथ
शिवसूत्रवार्तिके सूत्रेषु प्रतिपादितविषयसंग्रहः
तत्रादौ प्रथमप्रकाशे

१. ज्ञानक्रियात्मकत्वेन आत्मनः स्वरूपप्रतिपादनम् ।
२. अहन्ता-ममतात्मद्वैतप्रथाहेतुकस्यात्मस्वरूपावरणस्य लक्षणम् ।
३. अभेदज्ञानलोपकर्त्रीणां शक्तीनां निरूपणम् ।
४. द्वैतप्रथा - तत्कर्तृशक्तिसंघस्यादेर्निरूपणम् ।
५. स्वरूपावरणकृद्भिन्नज्ञानाभासनिवृत्त्यै स्वस्वात्मज्ञानाय च
हेतोरनुशासनम् ।
६. स्वरूपपरिज्ञाने वस्त्वन्तरतोऽपि अद्वैतख्यात्यपरिहाणि-
निरूपणम् ।
७. जाग्रदाद्यवस्थासु तुल्यतया स्वरूपोपलब्धिप्रदर्शकथनम् ।
८. सर्वभावेषु चिदात्मन एव ग्रहीतृ-ग्रहण-ग्राह्यतया
स्फुरणात्मज्ञानशक्तिरूपाया जागरावस्थाया लक्षणम् ।
९. पक्कौरवरकनानाविधभावोल्लेखनात्मविकल्परूपस्वप्ना-
वस्थायाः लक्षणम् ।
१०. ज्ञानज्ञेयस्वरूपशक्त्यनभिव्यक्तेः स्वरूपापोहकमाया-
शक्त्युद्भावितसुषुप्तावस्थालक्षणम् ।
११. स्वरूपाभिनिविष्टस्य प्रोक्तावस्थात्रये समकक्ष्यतया
सत्त्वादिगुणचयकर्तृत्वाद्वीरेश्वरत्वाभिधानम् ।
१२. विश्वात्मना स्फुरच्चिदात्मसमीक्षापरिनिष्ठस्यानुत्तर
भूमिकाधिरोहात्मसिद्ध्यभिमतिकथनम् ।
१३. इत्थं परभूमिकाधिरूढस्य निरावरणचिद्रूपसमावेशद-
खचितस्वातन्त्र्यशक्तिनिरूपणम् ।
१४. अस्यैव (योगिनः) विश्वस्मिंस्तादात्म्यसंपत्त्या अन्तर्बहिर्व्या-
पित्वकथनम् ।

१५. विश्वविश्वाधारभूते हृदि समस्तवासनावि-लयनात् सर्वभावानां याथात्म्यावबोधनिरूपणम्।
१६. शुद्धशिवचैतन्यलाभोपायकथनम्।
१७. शक्तिचैतन्यलाभफलकथनम्।
१८. आत्मचैतन्याधिगमनिरूपणम्।
१९. बाह्यान्तरतः स्वप्रकाशस्फुरणात्मानन्दातिशयो भाव-कसमाधिसुखस्य निरूपणम्।
२०. अस्यैतादृशः सिद्धयोगिनो निरावरणचिद्रूपसमावेश-यथेष्टशरीराद्युत्पत्तौ स्वातन्त्र्यनिरूपणम्।
२१. अस्यैव स्वातन्त्र्यसंपत्त्या यथेष्टक्रीडनरचनादिवैभव-सिद्ध्यभिधानम्।
२२. जितसिद्ध्युपेक्षणोत्तरं स्वात्मसाम्राज्यावाप्तिनिरूपणम्।
२३. समस्तभावोद्भवहेतुशक्तिमहाह्रदत्वात्मचित्स्वरूपपरा-मर्शपरिशीलनात् महावीर्यत्वनिरूपणम् ॥

अथ द्वितीये प्रकाशे

१. सर्वज्ञतादिगुणशिवात्मचित्तस्यैव मन्त्रत्वेनाभिधानम्।
२. चित्तात्ममन्त्रसमावेशे उपायकथनम्।
३. स्वप्रकाशविकासात्मविद्याया मन्त्ररहस्यत्वनिरूपणम्।
४. मनसः स्वकृतगुणलोपे अनुत्तरपदारूढ्युपायस्य तदन्यथात्वे अशुद्धविद्योद्गमात् चित्रभ्रान्तिसंभवनिरूपणम्।
५. स्वालोकात्म शुद्धविद्योदयात् स्वात्मचिदाकाश-संचारित्वावाप्तिनिरूपणम्।
६. मोक्षमन्त्रादिवीर्यादौ सद्गुरुवेद्यादिशक्तिपातपिशुना-त्मोपायप्रदर्शनम्।
७. सद्गुर्वाश्रयणादिशक्तिपातात् सन्मार्गाभिज्ञानात् सकला-नुशासनम्।
८. इत्थं मन्त्रतादात्म्यलाभे प्रज्वलज्ज्ञानाग्नौ पुनर्भव-हेतुककार्ममलोपादानाकशरीरस्य पुनर्भवाय हविष्-ट्वकथनम्।
९. लब्धस्वात्मवैभवस्य योगिनः परतृप्त्युपपादक-ज्ञानस्यैव भोज्यप्रायतयातिदेशनम्।
१०. अविशिष्टविद्यासंहारे तदुत्थस्वप्नविकल्पोत्थ-भावानां स्वप्रकाशोदयसत्तया स्वप्रकाशत्वेनैव दर्शनात् स्वालोककलनात्म नित्यतृप्ततादेशनम्।

अथ तृतीये प्रकाशे

१. स्वरूपप्रथनादिना विवक्षिते विभूतिप्रकरणे प्रथमतः संकल्पन-मननादिधर्मस्याणुसंबन्धि चित्तस्यात्मतया लक्षणम्।
२. चित्तस्य रागादिविषयसंश्लेषाद्भिन्नतया अवास्तव-ज्ञानस्य बन्धकत्वनिरूपणम्।
३. तत्त्वानां याथात्म्यबोधाभावरूपाया मायायाः स्वरूपकथनम्।
४. तत्त्वसंघातोपादानदेहस्थांशानां स्वकारणे लय-भावनादार्ढ्यात् स्वात्मस्वरूपावस्थ्या आणवोपायफल-परबोधात्मदेहाधिगमनिरूपणम्।
५. पृथिव्यादिभूतमयदेहस्थस्य तत्तद्भूतधारणाभ्यास-पाटवात्तद्भूत-भौतिकस्थिति संहार-निर्माण-संयोजन-वियोजनादौ स्वातन्त्र्यनिरूपणम्।

६. भौतिकतत्त्वधारणादिपाटवात् योगिनो मोहकर्तृकावरणेन तत्तत्त्वभोगसिद्ध्यभिलषणस्य, तदन्यथात्वे प्राप्य शुद्धावस्थाविमर्शनेन सार्वज्ञ्यादिसिद्ध्यनुपगमस्य च निरूपणम् ।

७. अनन्ततया विस्तृतात्स्वात्ममोहप्रशमनात् सुप्रबुद्धस्य स्वप्रकाशात्म शुद्धविद्योदय निरूपणम् ।

८. इत्थमधिगतसहजविद्यतया विश्वं स्वदीधितिकल्पं समीक्षमाणस्य नित्यप्रबुद्धावस्थया परिनिष्ठाकथनम् ।

९. विश्वस्मिन् यावत्तत्त्वभावरसावेशस्य पेशलतया चेष्टमानस्य आत्मनो जगन्नाट्यलीलाभिनयकत्व-निरूपणम् ।

१०. प्रोक्तगुणकात्मकर्तृप्रवृत्तिस्थित्यादिजगन्नाट्यलीला-धारतया पुर्यष्टकस्य रङ्गत्वाभिधानम् ।

११. अस्यैव सुप्रबुद्धतया बहिर्वर्तिनामिन्द्रियाणां जगन्नाट्य-लीलाप्रेक्षकत्वेन समभिव्याहरणम् ।

१२. शुद्धचिद्रूपाध्यवसायि बुद्धिसद्भावे सत्त्वोत्कृष्टतानु-शासनम् ।

१३. उक्तगुणस्यात्मनः स्वातन्त्र्यसिद्धिसंपन्नत्व निरूपणम् ।

१४. अधिष्ठीयमानदेहवत् अन्याश्रितपरकीयदेहादावपि सार्वज्ञ्य-स्वातन्त्र्यादिगुणाविर्भाव निरूपणम् ।

[२-१४] १५. परकायप्रवेशादिस्वातन्त्र्यस्यापि स्वधामनो विभ्रंशानवस्था-दिनिरूपणम् ।

१६. विश्वकारणशाक्तपदे निरन्तराभ्यासेन चिदात्मविमर्शन-समाहितस्यैव स्वधामाप्रच्युतिनिमित्ततयादेशनम् ।

१७. शाक्तपदसमावेशाधिगमात् परस्वतन्त्रसुगमता निदर्शनम् ।

१८. उक्तावधान-प्रवेशात्मोपायद्वयपरिशीलनात् स्वातन्-त्र्यधामविक्रान्तत्वे योनिकर्मशरीरानुसंधान-सामर्थ्यवत्त्वस्य निरूपणम् ।

१९. उक्तोपायपरिशीलनाच्छुद्धविद्योदयस्य पुनर्जन्मा-भावफलानुशासनम् ।

२०. प्राप्तसिद्धिकस्याप्यणोरवधानस्खलनात् शब्दानु-वेधनतो घोरादिसंज्ञकमाहेश्वर्यादिमातृकाशक्तीनां मोहकत्वनिरूपणम् ।

२१. उक्तमातृभेदेषु चिद्रसाश्यानभावेन शुद्धशिवतत्त्वानु-संधानदार्ढ्यान्नित्यं समाहितापरिशीलननिरूपणम् ।

२२. वर्णानुप्रवेशजन्यशुद्धशिवतत्त्वानुसंधानदार्ढ्याय चित्तमग्नो-पायनिरूपणम् ।

२३. वर्णात्मन्यन्तकोट्यवस्थाविमर्शपरिहानात् मध्य-कोटिविश्रामे विचित्रविकल्पनाव्याघातात् मोहाधि-गमनिरूपणम् ।

२४. परनादात्मप्रकाशसमापत्तौ परातो वैखर्यन्तं प्रसरत्-पदमन्त्रादीनामभेदानुभवदार्ढ्यादनुत्तरसामरस्याधिगम-निरूपणम् ।

२५. मायादितत्त्वग्रामानुसंधानान्तरभूमिसमावेशबलाधि-गमेन नष्टभावशरीरानुप्राणनात्म सर्वज्ञत्व-सर्वकर्तृत्वादि-परमैश्वर्यलाभनिरूपणम् ।

२६. इत्थं शिवस्वरूपपरिशीलनातिशयाच्छरीरादिसद्भावेऽपि शिवसारूप्यनिरूपणम् ।

२७. एवं ध्रुवसमाधानवतः शारीरव्यापारस्यापि व्रततयातिदेशनम्।

२८. तथैवं पराहंभाव भावनापदारूढसंबन्धिसामान्य-संलापस्यापि जपतया निरूपणम्।

२९. अस्यैव पशुषु आत्मस्वरूपज्ञप्ति प्रकाशनस्य दान-तया अतिदेशनम्।

३० उक्तसंसिद्धियोगिनो विश्वोल्लासनादिसामर्थ्ये वैश्वरूप्य-भोगमोक्षप्रदत्वादिनिरूपणम्।

३१. शिवतुल्यतापत्तिर्निजानुत्तरशक्तिमयविश्वात्मना स्फुरत्तानिरूपणम्।

३२. विश्वात्मताधिगमात् क्रियाशक्त्युन्मीलितविश्वस्य स्वेच्छया स्थिति लय कर्तृत्वनिरूपणम्।

३३. सृष्टिस्थितिध्वंसकालेऽपि अविलुप्तस्वस्वरूपत्वनिर्देशनम्।

३४. स्वविमर्शप्रच्युत्या आध्यात्मिकादिनानाविधसुख-दुःखाविर्भावेऽपि तदस्पर्शनिरूपणम्।

३५. सुखाद्यसंस्पृष्टस्याविलुप्तस्वात्मविमर्शतया केवल-चिन्मात्रविश्रान्तित्वकथनम्।

३६. शरीराद्यहंभावविजृम्भणे सुखादिमोहाभिपातात् कर्मात्मसंसारिपशुत्वनिरूपणम्।

३७. स्वव्यतिरिक्तं किंचनात्मपदार्थं लोचयतः स्वस्वरूपप्रत्या-पत्त्या नवनवोल्लेखसंनिवेशप्रथिता पूर्व सर्गकर्तृत्व-सामर्थ्यावाप्तिनिरूपणम्।

३८. विचित्रभावोल्लासनात्मसर्गान्तरोत्पादनसामर्थ्ये स्वानुभवस्यैव हेतूपदेशनम्।

३९. जाग्रदाद्यवस्थासु रूढभूततुर्यावस्थया भावानां स्वबलार्पणे निदानादेशनम्।

४०. चित्तस्य स्वरूपात् प्रच्युतेः करणग्रामेऽपि स्वरूपप्रथया चिदात्माभिव्यञ्जनकथनम्।

४१. अधरावस्थायां दर्शनश्रवणादिप्रवृत्तौ धीरात्मको बुद्धिकर्मेन्द्रियेषु चिद्बलाधानेऽध्यात्माभिलाषेण संबाध्यकरणचक्रस्य प्रेरणात् शब्दस्पर्शादिविष-येषु प्रवर्तननिरूपणम्।

४२. स्वबलोद्योगाधिष्ठितात् रूढविज्ञानस्य पाशवाभि-लाषध्वंसात् संवासात्मनुभूयैकप्रकाशसंभवादेशनम्।

४३. अभिलाषात्ममलक्षये सर्वज्ञत्वसर्वकर्तृत्वादिभूम्या-रूढस्य भौतिकदेहसंबन्धसत्तया शिवतुल्यताप्रशंसनम्।

४४. स्वप्रकाशसंविन्निष्ठत्वात् पुर्यष्टकाभिमानप्रशमेऽपि यावत्कर्मोपभोगं प्राकृतिकतया प्राणतत्संबद्धभूत-कञ्चुकावस्थितिनिरूपणम्।

४५. शिवतुल्यताप्राप्तौ अनुत्तरस्वात्मसिद्ध्युपायसनाथं प्राणाभिनाहतशब्दब्रह्मोपासनानिर्देशः।

४६. मायाशक्तिवशाद् भेदखण्डनाद्यपदस्य विभोः प्रोक्तोपदेशमार्गेण कालुष्यप्रक्षयात् स्वात्मावबोधाधि-गमे चिद्घनानन्दशिवताभ्युपगमानुशासनम्।

ओं नमः श्रीशंभवे स्वात्मानन्दप्रकाशवपुषे

अथ

शिवसूत्राणि

श्रीभट्टभास्कराचार्य-विरचितवार्तिकोपेतानि

तत्रायं प्रथमः प्रकाशः

हिमगिरितनयाकान्तं
शशधरकलिकोत्तंसम् ।
स्थितिलयजनिकर्तारं
प्रणमत वरदं देवम्[1] ॥१॥

---

१. अतिस्वच्छतरात् अनुत्तरध्रुवपदात् अनिमिषतया स्वस्वातन्त्र्यशक्त्या कमनीयम्, विश्वसंजीविनी अमाख्या कला उत्तंसो मुख्योपकरणं यस्य तादृशम्, सृष्ट्यादिपञ्चकृत्यकरणशीलं, देवं द्योतनादिसतत्त्वं विश्वोल्लासनादिक्रीडापरं च, प्रोत्कृष्टस्वात्मलाभात्मवरदं स्वात्मानं समाविशतेत्यर्थः । बाह्यार्थस्तु स्पष्टः । अत्र प्रथमे पदे शक्तिमत्स्वरूपप्राधान्यतया सामान्यचित्स्वरूपस्य, द्वितीये शाक्तस्वरूपप्राधान्येन सहजविद्योदयस्य, शिष्टे विश्वनाट्योल्लासिस्वरूपमुख्यतया विभूतेर्वर्णनात् वक्ष्यमाण प्रकाशत्रयोपक्षेपणं कृतम् ।

नित्योदितनिजाभासस्फुरत्तानिह्नुतात्मने।
शिवाय परिपूर्णचिद्रूपवपुषे नमः ॥२॥
श्रीमन्महादेवगिरौ वसुगुप्त[1]गुरोः पुरा।
सिद्धादेशात् प्रादुरासन् शिवसूत्राणि तस्य हि ॥३॥
सरहस्यान्यतः सोऽपि प्राददाद्[2] भट्टाय सूरये।
श्रीकल्लटाय सोऽप्येवं चतुःखण्डानि तान्यथ॥४॥

[विवक्षानुसारं व्युत्क्रमेणैव सूत्राणि खण्डचतुष्टया संचिन्त्य व्याख्यातानि तावदीमानं क्रममाश्रित्य। तदेवं सूत्राणां प्रकरणत्रयमेवार्थविवक्षानुसारं खण्डचतुष्टये विभक्तं भवेत्]

---

२. सदोदितस्वप्रकाशात् अनवरतं प्रसरद्भिः पञ्चभिः स्वाभिन्नैः-र्विश्वादतमसीलादि स्फुरत्तया। आवृताकृतेः शिवस्य संकुचितात्मप्रकटीकरणम्, वस्तुतः तादवस्थ्येऽपि पूर्णसंविदात्मावस्थायाः अहानिरित्याशयः, अनेन तृतीयप्रकाशे अवरोहक्रमाभ्यासादिषु वक्ष्यमाणसारार्थसर्वस्वं सूच्यते।

अस्मिन्पुस्तकविशेषे उपलक्ष्यमाणो गुरुपारम्पर्योपदिष्टार्थस्तु यथा - स्वात्मैव शिव इति, तथा चोपनिबध्यते 'तत्रात्मन्येव शिवता सर्वस्यास्खण्डिते न हि' इति। अथ कथं संसारिणः शिवत्वं? अत्रोच्यते - विमोहिनी शक्तिवशात् आत्माच्छादित एव भवति, न त्वाच्छादितः परमार्थतः सदा प्रकाशमानत्वात्, तदाच्छादने सर्वव्यवहारोच्छेदः स्यात् तथा च वक्ष्यते
'सा चास्त्यहन्तेदन्तादि ज्ञानाभासादिनावृता।'

व्याकरोत् त्रिकमेतेत् स्पन्दसूत्रैः स्वकैस्ततः।
तत्त्वार्थचिन्तामण्याख्यटीकया खण्डमन्तिमम्॥५॥
[अत्र - न तु सूत्रक्रमेणापि तु विवक्षितार्थक्रमेण
अन्तिमम् - तदपि व्युत्क्रमेणैव संगृहीतं स्यात्]
एवं रहस्यमस्यैव मातुलेयाय चावदत्।
श्रीमत्प्रद्युम्न[3]भट्टाय सोऽपि स्वतनयाय च॥६॥
श्रीमत्प्रज्ञार्जुन[4]ाख्याय प्राह सोऽप्येवमावदत्।
श्रीमहादेव[5]भट्टाय स्वशिष्याय यतः पुनः॥७॥
श्रीमच्छ्रीकण्ठ[6]भट्टाय प्रददौ स्वसुताय च।
तस्मात् प्राप्य करोम्येष सूत्रवार्तिकमादरात्॥८॥
दैवाकरिर्भास्करोऽहमन्तेवासिगणेरितः।
यस्मादागमविभ्रान्तेः क्षुभितबुद्धयः॥९॥
सुकुमारमतस्तानि सूत्राणि विवृणोमि च।
[(५) प्रद्युम्नभट्ट - तत्त्वगर्भस्तोत्रनिर्माताऽयं प्रद्युम्नभट्टः
तदुल्लेखनः शिवदृष्टितत्त्वे:।]

[(६) दैवाकरि - कदाचिद् भट्टदिवाकरवत्सोऽयं येनस्याद्
विवेकाञ्जन निर्माता।]

इति किं तर्हि तदपसरणकारणम्? - ईश्वरानुग्रह एव। तथा च 'शक्तिपातवशाच्छैवि नीयते सद्गुरुं प्रति'
इति तत्रानुग्रहे सति स्वस्वरूपं सिद्धरूपं स्फुटीभविष्यति। तथा तस्य चैवं-विधस्य स्ववश एव सर्वं भवति। तदुच्यते।
स्वस्वरूपं शिवः साक्षात्
इत्यादि।

[१. वसुगुप्त २. आदभट्टाय ३. प्रद्युम्नभट्टाय ४. प्रज्ञार्जुन ५. महादेव-भट्टाय ६. श्रीकण्ठभट्टाय ७.- भास्करभट्ट]।

तत्रात्मन्येव शिवता सर्वस्याखण्डितैव हि[3] ॥१०॥
सदास्त्यपि हन्तेदन्तादिज्ञानाभासादिनावृता।
तस्यावृतिविनाशाय स्वरूपज्ञप्तये शिवः ॥११॥
सक्रमज्ञानदर्शितं सूत्रजातमदात् कृपाकुलः[4]।
स्वस्वरूपं शिवः शास्त्रस्योन्मेषनिमेषतः[5] ॥१२॥
शक्तिप्रसरसंकोचनिवर्तकावुदयव्ययौ।
जगतो ज्ञानदेहस्य कलाचक्रस्य चोद्भवः ॥१३॥
[१३ - ज्ञानदेहस्य - ज्ञेयात्मकस्य धर्मीभावा भासमानस्य प्रकाशस्य। देहोऽत्र धर्मीभावः ज्ञानं च प्रकाशः।]

---

3. स्वात्मैव शिवः चिदात्मा न तु व्यतिरिक्तो बाह्यान्तराभिमत इव, शिवता हि सर्वस्य स्वानुभवसिद्धा परिस्फुरितैव कार्यकारणात्मैकवश्यस्य सर्वविश्रान्तिस्थानं यत्प्रत्यभिज्ञापनाभावानुप्राणं व्यवहारदशायां भावर्जनादिरूपस्वातन्त्र्यमुपलक्षणं सिद्धम् तदयैकावगमप्रतीता सैव स्वेच्छानिर्मितमायाप्रमातृतावशात् इदन्ताज्ञानसंवादिताकृतिरिव पुद्गलैरुपलभ्यं न पार्यते, अतस्तद्विकासानुग्राहकानुजिघृक्षोः श्रीशिवात् सूत्राणामवतारः।
4. तीव्रतरशक्तिपातिनः शाम्भवज्ञानेन, तीव्रमध्यशक्त्यनुगृहीताः शाक्तज्ञानेन, मन्दशक्तिपातवन्त आणवज्ञानेन अकैवल्यतरादिसोपानाधिरोहणक्रमेण सर्वे शैवपदवीमास्वादयन्ति इत्यतोऽधिकारिभेदापेक्षया सूत्राणां त्रिक्रमनुपन्यासः।
5. उन्मेषो नाम शक्तिप्रसरः, निमेषो नाम तत्संकोचः; तन्निवृत्यावेव विशुद्धसंविन्मात्ररूपस्य जगतः सिद्धिवृद्धादिकलाचक्रस्य तन्निभृतस्य शिवादिदेवचक्रस्य वा खेचर्यादिशक्तिप्रसरणस्य वा सृष्टिस्थितौ।

तत्स्वरूपस्योपन्यासे बहवो विप्रतिपत्तयः[6]।
संस्थितास्तत्समुदासार्थं शिवः सूत्रमरीरचत् ॥१४॥

चैतन्यमात्मा ॥१॥

चैतन्यमात्मनो रूपं सिद्धं ज्ञानक्रियात्मकम्।
तस्यानावृतरूपत्वाच्छिवत्वं केन वार्यते ॥१५॥
[न वारयितुं शक्यते केनापि धीमता।]

तदावृतेरुपन्यासं सूत्रमाह महेश्वरः।

ज्ञानं बन्धः ॥२॥

अहं ममेदमिति यज्ज्ञानं भेदप्रथात्मकम् ॥१६॥
शाब्दानुवेधतो जातं मायीयमलमूलकम्।
तद्बन्धनं समाख्यातमविद्यावृतिलक्षणम् ॥१७॥

६

६.

शब्दानुवेधेन चास्मिन्कारणं किमतोऽवदत्।
सूत्रं पञ्चोर्म्यादिकानां कलानां प्रतिपादकम् ॥१८॥

योनिवर्गः कलाशरीरम् ॥३॥

योनयः शक्तयो ज्ञेयाश्चतस्रः सर्वकारणम्।
अम्बा ज्येष्ठाभिधा रौद्री वामा च शिवमूर्तयः ॥१९॥
तासां वर्गः समूहः स्यात्तच्छरीरं कलासु च।
अकारादिक्षपर्यन्ता कलास्ताः शब्दकारणम् ॥२०॥
मातरः शक्तयो देव्यो रश्मयश्च कला स्मृताः।
एता शब्दानुवेधेन प्रत्ययोल्लासिकाः पशोः ॥२१॥
तेनासौ मोहतां याति तासां स्वविभवे यतः।
तस्य लुप्तं तदुच्येत ज्ञानाभासेन सर्वदा ॥२२॥

ज्ञानाभासस्य तासां च किमाधारो ह्यतोऽवदत्।

ज्ञानाधिष्ठानं मातृका ॥४॥

ज्ञानस्यैव द्विरूपस्य परापर विभेदितः ॥२३॥

स्यादधिष्ठानमाधारः शक्तिरेकैव मातृका ॥४॥
[मातृकैव देवीह ज्ञाता सती परस्य मोक्षात्मकस्य ज्ञानस्य च अपरस्य बन्धरूपस्य ज्ञानस्याधिष्ठानम्।]

उद्यमावृतिरूपं यज्ज्ञानं बद्धनिवृत्तये ॥२४॥
यत्नाय स्वस्वरूपस्य सूत्रमीशोऽत्र भाषत।

उद्यमो भैरवः ॥५॥

परिपूर्णस्वरूपस्य शिवस्येत्थं चिदात्मनः ॥२५॥
स्वस्वरूपापरित्यागं कार्यं प्रत्युद्बुभूषतः।
भाव उद्योग उन्मेष उद्यमः परिगण्यते ॥२६॥
तदेव जगदारम्भात् शार्वं तत्त्वं च भैरवम्।
तत्रापि स्वपरिस्पन्दस्फुरत्तायां स भैरवः ॥२७॥

[२५ - उद्बुभूषतः - उद्भवितुमिच्छतः स्वयं शिवात्मकत्वेन
विश्वरूपतया विभासयतः]

[२७ जगदारम्भात् - तथाविधम् अनुस्फुटत्वमेव
स्फुरत्तायां - जगदानन्दात्मके ?

भरणाद्रमणादत्र वमनाच्च चोच्यते ।१०
अखण्डितनिजाभाससम्पादनादपि चिद्विभो: ॥२८॥
विभु:?

एवमुद्यमितन्त्रस्यास्य चिद्वपुर्भैरवात्मनः ।
उन्मेषेऽपि स्वस्वरूपप्रकाशो न प्रहीयते ॥२९॥
उत्कृष्टत्वेऽपि नित्यस्य यथा न परिहीयते ।
तथा स्थितिस्तत्प्रसिद्ध्यर्थं स्वतन्त्रो महेश्वरः ॥३०॥

शक्तिचक्रसंधाने विश्वसंहारः ॥६॥

शक्तयश्च जगत्कृत्स्नं ताश्च ज्ञानक्रियात्मिकाः ।
वृत्तयः सर्वनिर्दिष्टास्तच्चक्रं चकनादतः ॥३१॥
तत्संधानं स्वीकरणं स्वात्मन्येव निमेषतः ।
संहारः, प्रविलीनत्वं, शिवत्वं तेन तस्य तत् ॥३२॥
एवं शब्दार्थरूपाद्वा जीवस्योन्मेषसंहृतौ ।
कारणं परमात्मैव भैरवः स शिवस्तदा ॥३३॥

[३१- चकनादतः - ज्ञातः सिद्धः, अज्ञातस्येच्छाप्रतिघात कारिण्या । तृप्तिप्रतिघातयो ।]
[३२ - निमेषतः - जगच्चक्रनिमीलनतामुत - चक्रस्य ।
स्वात्मसात् करण]

स्वस्वरूपपरिस्पन्दादच्युतस्य चिदात्मनः ।
जाग्रदादिविभेदोऽयं स्यादनात्मको यथा ॥३४॥
तद्धर्मिणि हि देवेशः स्वतन्त्रः यथार्थवत् ।

जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभवः ॥७॥

स्वस्वरूपैकघनताविमर्शात् तुर्यभूः स्मृता ॥ ३५ ॥
सर्वानुस्यूतरूपत्वाद् गलित भ्रम संस्थितेः ।
तुर्याभोगात्मसंवित्सा सुप्रलब्धस्वरूपता ॥ ३६ ॥
स्थितैव जाग्रदादीनां भेदे सर्वत्रापि स्फुरेत्[१२] ॥

एवमुक्त्वा जाग्रदादिव्याप्तये परमेश्वरः ॥ ३७ ॥
सूत्रत्रयमन्ववदज्जीवन्मुक्तत्वसिद्धये ।
ज्ञानं जाग्रत् ॥ ८ ॥

(पूर्वं सम्बन्धित) (→अहंकारिका) ज्ञानस
बौद्धं शैवं च सांकल्पं श्रावणं स्पार्शं च रूपजम् ॥ ३८ ॥
रसजं गन्धजं चान्यदिति द्वयं ज्ञानमेव यत् ।
अत्र ग्रहीतृग्रहणग्राह्यरूपा चिदात्मनः ॥ ३९ ॥
स्फुरत्येव ज्ञानशक्तिर्जाग्रद्वृत्तिरिहैव सा ।
पशोः स्वरूपहान्यैव साऽऽवृत्तिः परिकीर्त्यते[१३] ॥ ४० ॥
स्वप्नो विकल्पाः ॥ ९ ॥
ऐशस्वभावस्य विभोस्तत्तैवन्तोदयः ।[१४]
विकल्पानां स्मृतः स्वप्नस्त्वैशार्थनिरासतः ॥ ४१ ॥
पतिभावाद्विकल्पानां दृढतां दृढता पुनः ।
[पतिभावे तु स कल्पनादि सृष्टिः, स्थिरैव, योऽपि -
दृढन्ततः स्थिरा]

पशुत्वापादवृत्तिः सैव ज्ञेया शक्त्यात्मनः प्रभोः ॥४२॥

अविवेको माया सौषुप्तम् ॥१०॥

ज्ञानज्ञेयस्वरूपायाः शक्तेरनुदये यदा ।
चिद्रूपस्याविवेकः स्यादसौ मायाविमर्शितः ॥४३॥
सैव मायावृत्तिजालपोषकत्वात्प्रकीर्तिता ।
अत्र - अर्थस्मृती स्वात्मसंस्थे, चिद्रूपे सा सुषुप्तता ॥४४॥
यत्पुरेवं स्वविश्रान्त्या पशोरावृत्तिरुद्गतः ।
इत्थं तिस्रस्त्रिप्रकाराः प्रत्येकोन्योन्ययोगतः ॥४५॥
गुरुण्यगौणत्वभेदेन ज्ञेयाः सम्यक् चिदात्मनः ।
एवं ज्ञातृज्ञेयमयः पतिरत्र परह्वये ॥४६॥
सुषुप्ततुर्ये तत्पारे सच्चिन्मयश्च विभुः स्मृतः[४५] ॥

[४४ - प्रकीर्तिता - सैव माया प्रकीर्तिता, स्वात्मसंस्थे - चित्स्वरूपलीने]

[४५ - तिसृष्वपि जागरादिदशासु त्रैरूप्यमस्ति । तथा - यावद्यथा स्वप्नदशोचितं प्रथमविकल्पं ज्ञानं सा जागरा । ये तु तत्र विकल्पाः स स्वप्नः । तत्त्वविवेचनं सौषुप्तम् । सौषुप्ते यद्यपि विकल्पाः न संवेद्यन्ते, तथापि तत् प्रविविक्षायां तथोचित जाग्रज्ज्ञानमिव तदनन्तरं संस्कारकल्पविकल्पनरूपम् ।

अथास्मिन् तिसृणामवस्थानां गुणत्रयम् ॥४७॥
स्थितमेवानुषङ्गेण तदर्थं सूत्रमुक्तवान् ।

त्रितयभोक्ता वीरेशः ॥११॥

सत्त्वरजस्तमश्चेति त्रितयं गुणसंज्ञितम् ॥४८॥
अवस्थानुगुणं तद्धि स्वस्वरूपादुदेत्यलम् ।
आच्छादकं वस्तूनां तत्स्वस्थितेस्तु विभोः पुनः ॥४९॥
-संतानस्यूतरूपत्वात्स्वरूपाच्छादनं न तत् ।
इत्थमेव गुणस्पन्दतिः स्पन्दानां च चिद्विभुः ॥५०॥
भोक्ता स्वीकरणात्प्रोक्तः प्रसरस्य विमुक्तवतः ।
अत एव हि वीरेशः स्वप्रकाशैकशुद्धवृत्तितः ॥५१॥
एवं मरीचिनिचयो गुणत्रयसमुद्भवः ।
वैकल्पिके जगत्यस्मिन्नवमनग्रासतत्परः ॥५२॥
तत्रापि ग्रासकृद्धर्ममात्रेण वीरेश्वरः स्मृतः ।

[५२- ~~[illegible]~~ तत्रापि - तस्यापीति तात्पर्यम् । तद्विषयेऽपि, मरीचिनिचयविषयेऽपि]

एवं स्वस्य स्वभावस्य व्युत्थानेऽपि यथा स्थितिः ॥५३॥
स्वेच्छा न प्रच्यवत्याय तदर्थं सूत्रमादिशत् ।

विस्मयो योगभूमिकाः ॥१२॥

एवं सर्वस्य सर्गादेः कारणं चिद्विभुः प्रभुः ॥५४॥
तदधिष्ठितमेवेदं जगत्समवलोकयन् ।
विस्मयाविष्ट इव यत्तिष्ठति ज्ञातिमानवान् ॥५५॥
तस्य विन्द्वादि भावौघसंबन्धाद्विस्मयोदयः ।
समाधिव्यपकायस्ताः स्युर्या एता योगभूमयः[१७] ॥५६॥

[५६- संबन्धाद्वि - विनैव धारणादिकं स्वयमेव । सम्बन्धमनुभवतीति स्वसंवेदे पंचमी-तत्र योगभूमयः विनादि योगारूढोऽस्मि] [विस्मयः - मायाकुशलिनीति पद्येन स्वलिता:]

एवमस्याप्रतिहता सर्वेच्छा च विजृम्भते ।
तदर्थं भगवान् सूत्रमभ्यभाषत शंकर ॥५७॥

इच्छाशक्तिरुमा कुमारी ॥१३॥

सर्वनिर्माणचित्री शक्तिरिच्छैव परमात्मनः ।
सर्वदृक्कर्तृतायोगात् कुत्सोवत् सृतिकारिणी ॥५८॥
निरावरणचिद्रूपसमावेशध्रुवत्वतः ।
तदेव कारणं तस्य सर्वत्राखण्डितं किमोः[१८] ॥५९॥

[५८- कु- भेदोत्पादिका मायाभूमिं मारयति । अतु भिन्नं मारं करोतीति तच्छीला । परानुपभोग्या, भोक्त्रैकात्म्येन स्फुरन्ती । उमा कुमारीव परिहृतसर्वसंग, अहं स्वरात्मा साधकाराधनाय नित्योद्युक्ता तस्येच्छा इति]

एवं सर्वात्मकस्यास्य किमेकं देहिदेहवत् ।
शरीरमुत वा सर्वमत्रोवाच सुरेश्वरः ॥६०॥

दृश्यं शरीरम् ॥१४॥

[१९] सर्वभावो ध्रुवस्यास्य सर्वबीजात्मनः प्रभोः ।

चिद्रूपस्य व्यापकत्वात्त्वेकं तस्य शरीरकम् ॥ ६१ ॥
तेन बाह्यार्थ एवास्य, यो वा दृश्यो विकल्पजः।
स स देहो, व्यापकत्वात्सर्वभावेष्ववस्थितः ॥ ६२ ॥
स्वर्गादिचित्स्वरूपेण तादात्म्यात्सर्वदेहभृत्।
शरीराव्यतिरेकेण दर्पणप्रतिबिम्बवत् ॥ ६३ ॥
दृश्यं यस्य व्यापकत्वात्स मोक्षश्रीनिकेतनम् ॥
[६२- बाह्यार्थ - न केवलं बाह्य एवार्थो नीलादयो वस्तुस्वरूपादि]

एवमेवं ज्ञानसद्भावस्तद्योगश्च कथं भवेत् ॥ ६४ ॥
स्वात्मन्यधिरूढस्यास्य तदर्थं सूत्रमाह च।
हृदये चित्तसंघट्टाद्दृश्यस्वापदर्शनम् ॥ १५ ॥
१०. आधारभूते हृदये चेतसः स्थित्युपग्रहः
[स्पन्दनाख्ये स्थिते चिदात्मके तत्त्वे]

संघट्ट उच्यते तेन स्याद्दृश्यस्वापदर्शनम्।
सौषुप्तं व्योम हृदयं मध्यस्थत्वात्प्रभण्यते ॥ ६६ ॥
आत्मनः समाधानं यत्संघट्टः स चेतसः।
तदुत्थवृत्तिजालस्य स्वात्मन्यैक्यादुदीरितः ॥ ६७ ॥
शरीरादेस्तदा तस्मिन् व्योम्नि लीने यदा तदा।
ब्रह्मदानवधस्तस्य स्थित एवानुषङ्गतः ॥ ६८ ॥
दृश्यं स्यादुपलम्भं यन्निरावरणलक्षणम्।
स्वस्वरूपं प्रबुद्धे तत्तत्प्राप्तिदर्शने स्मृतम् ॥ ६९ ॥
स्वापकारस्य मोहस्य हानावत्र च दर्शनम्।
क्रियमुद्रासमावेशात्प्रबुद्धः सर्वदा विभुः ॥ ७० ॥
अप्रबुद्धमतेस्तस्य स्यात्स्वापस्यैव दर्शनम्।
सोऽभ्यासात्प्रबुद्धस्य स्वप्नस्वातन्त्र्यमेव तत् ॥ ७१ ॥
[६८- ब्रह्मदानवध - यस्य ब्रह्म च क्षत्रं च उभे भवत
ओदनः]

तमोऽवरणनिर्भेदः सोऽयं च प्रतिभोदयः ॥

अन्तर्बहिर्विचार्यैव स्वरूपं तद्विवर्जनात् ॥७२॥
अखण्डमण्डलीकारं परिपूर्णं करिष्यताम् ।
तदर्थं शिवशक्त्यात्मभेदे हि यतिर्यथा स्थिता ॥७३॥
स्वालोकनं च न हीयेत प्राह सूत्रत्रयं विभुः ।
[७२ - तत - अन्तर्बहिर्भाव विवर्जनात्]

शुद्धतत्त्वसंधानाद्वा[२१] ॥ १६ ॥

शुद्धं निरुपाधि ज्योतीरूपं तत्त्वं शिवाभिधम् ॥७४॥
तत्संधानं तदात्मत्वविमर्शस्तेन वा भवेत् ।
तमोवरणनिर्भेदः परिपूर्णैकरूपतः ॥ ७५ ॥
ब्रह्माहं भावसंयोगादखण्डित निजस्थितिः ॥
[७५ - विमर्श - अहमित्येव परिपूर्णतया विमर्शनम्]

इति शिवचैतन्यनिरूपणम् ॥

[२२] स्वपदशक्तिः ॥ १७ ॥

स्वपदं स्वपदं ज्ञेयं शिवाख्यं यदुदीरितम् ॥७६॥
तदीयं हि क्रियारूपं यत्सा शक्तिः प्रकीर्तिता ।
तस्याः कर्तृत्वसंवेशो लीनता स्यात्स्थितिश्च सा ॥७७॥
तदैव प्रतिभालोकः स्यात्प्रकाशैकमन्थरः ॥

इति शक्तिचैतन्यनिरूपणम् ।

[२३] वितर्क आत्मज्ञानम् ॥ १८ ॥

[वितर्के इति सप्तमी । वितर्के सत्यात्मज्ञानं तस्य भवति योगिनः ।]

उपाध्युपाधिसंभेदे विवेकः प्रत्यवेक्षणम् ॥७८॥
स वितर्कः स्वस्वभावविमर्शैकघनात्मनः ।
आत्मनः शिवरूपस्य प्रत्यभिज्ञाप्रसाधने ॥७९॥

[७८ - उपाध्युपाधि - शरीरादिषु तदुपाधेः सति शिवात्म - भावेऽहमित्यहमेवेदमिति यो विवेक आत्मस्वभावे शास्तदैव सम्यक् प्रत्यवेक्षणम्, परीक्षणम् तर्क साहाय्येन ।]

यत्तत्साधनं ज्ञेयं तस्मिन्सत्यात्मसंवेदनम् ।
तस्मात्तत्प्रतिभोन्मेषः स्याच्छुद्धस्यात्मनः परः ॥ ८०॥
इति आत्मचैतन्यनिरूपणम् ॥

महानन्द-परानन्द-निरानन्दस्वरूपकम् ।
शिवभावात्मचैतन्यत्रयमेतन्निरूपितम् ॥ ८१॥
विश्रामलाभसौल्लासभूमिसंज्ञं त्रयेण च ।
स्थूलाना . . .

. . . पुनरत्याह यथास्य प्रतिभोदये ॥ ८२॥
स्वरूपलाभसौख्यं प्रकाशैकरसं कथ्यतम् ।
लोकानन्दः समाधिसुखम्[२४] ॥ १८ ॥
चित्प्रकाशः परः शुद्धस्वान्तर्बहिरिवोदितः ॥ ८३॥
क्रियः सर्वात्मकः सर्वः सर्वभावैर्ध्रुवो विभुः ।
स लोक इति विज्ञेयः स एवानन्द उच्यते ॥ ८४॥
चित्प्रकाशैकघनं निर्मलत्वात्स्फुरत्प्रभुः ।

तदास्वादैकतानत्वात्समाधिसुखमीर्यते ॥ ८५॥
यद्वा गृहीतृग्राह्यैकवर्गप्रसरणात्मके ।
पदद्वये स्वप्रमोदस्तत्समाधिसुखं स्मृतम् ॥ ८६॥

एवं स्वतन्त्रस्य सतः स्वेच्छाकर्तृत्वसूचकम् ।
सूत्रं प्रोवाच भगवान्कृत्रिमफलोदये ॥ ८७॥
यतः क्रियात्मिका शक्तिर्विधायित्री प्रभुत्वतः ।
शक्तिसंधाने शरीरोत्पत्तिः[२५] ॥ २० ॥
शक्तिमत्स्वपादानतः सोऽद्रूपः प्रकाशकः ॥ ८८॥ शरीरकरण-जगतां
अन्तःस्थितानां भावानामिच्छयैव बहिर्यतः ।

इच्छाज्ञानक्रियारूपाः शक्तयः पञ्च संस्थिताः ॥५९
ईशान्यापूरणी हार्दी नाम्ना मूर्तिश्च नामतः ।
अन्या विज्ञानदेहाख्या आसाभिवानुगाः स्मृताः ॥
प्रक्रियादेहनिर्माणमासां संधानमुच्यते ॥६०॥
तस्मिन्सति शरीरस्य यस्य यस्य यथा स्थिता ।
स्यादुत्पत्तिस्तथा तिर्यङ्नरामरविलक्षणा ।
इत्थं कर्तृत्वमेतास्य सर्वत्राक्षय्यखण्डितम् ॥६२॥
सत्यालोकेऽपि (आत्मन) कार्यस्य (शरीरादेः) शायित्वं च निरूपितम् ।
[५९ - क्रिया - पूर्वे चिदानन्दे इच्छा ज्ञानं च क्रिया
रूपे चेति स्पष्टः ।]
[६० - प्रक्रियादेह... - आसां प्रयोगसाफल्यं]

एतातन्त्र्यात् पुनरस्यैव विभवप्रतिपादकम् ॥६३॥
अतीव भगवान् सूत्रं एवं क्रीडानिरूपणम्
भूतसंधानभूतपृथक्त्वविश्वसंघट्टः ॥५४॥

शब्दस्पर्शरूपाद्यवयवैः रवादिभूतनिर्मितिः ॥६४॥
संधानमुक्तं तत्तेषां मूर्तिभेदविवक्षया ।
प्रतिभूतं च भूतं च स्वसत्त्वकं विविक्तता ॥६५॥
पृथक्त्वमुच्यते तद्धि, कर्त्रंश प्रकारो यतः ।
तृप्त्याह्लादप्रकाशाख्य स्पर्शानुभवभूरुहः ॥६६॥
ज्ञेयौ ज्ञानक्रियेऽर्केन्दू यजमानस्य चिद्विभोः ।
यतस्मिंस्तथा भूत - विश्वसंघट्ट उच्यते ॥६७॥
प्रतिमूर्ति क्रियायोगं कथनं चिद्विभोरतः ।
एतावद्विश्वमेवेह यदष्टकसमागमः ॥६८॥
[६५ - स्वसत्त्वकं - प्रातिस्विक सत्त्वकं ।]
[६६ - पृथक्त्व - भेदविवक्षया तेषां पृथक्त्वमुच्यते]

कथं सर्वस्य जगतः कारणं शक्तिस्तथा।
आत्मनस्तत्प्रभुत्वं स्यात्तदर्थं सूत्रमुक्तवान् ॥ ९९॥

शुद्धविद्योदयाच्चक्रेशत्वसिद्धिः ॥ २२॥

शुद्धं निरुपाधि ज्योतिः सर्वाभासावभासकम् ॥१००॥
तस्यानन्तार्थकर्तृत्वात्परत्वानन्यधर्मिणः।
वेदना वर्णिता विद्या सर्वाहंबोधरूपिणी ॥१०१॥
तस्योदयात्तत्प्रथनं तस्माच्चक्रेशलक्षणा।
सिद्धिर्भवति विश्वत्र माहेश्वर्यविकस्वरा ॥ १०२॥

इत्थं सति कथं मन्त्रवीर्यसंविद्भवत्यतः।
सूत्रमाह महावीर्यत्वस्य प्रतिपादकम् ॥ १०३॥

२८

महाह्रदानुसंधानान्मन्त्रवीर्यानुभवः ॥ २३॥

चिदात्मैव परः शुद्धः शक्तिमण्डलविग्रहः।
सृष्टिस्वभावो भावानामुद्भवे परमेश्वरः ॥१०४॥
त्रिकालकलनाहीनो सततविच्छिन्नसंततिः।
महाह्रदसमानत्वात्स महाह्रद उच्यते ॥१०५॥
तदकृत्रिमसारण्यातं बलमात्मनि तत्र च।

इगानन्दावलीसारमध्ये स्वरसलक्षण: ॥१०६॥
त्रिकस्वरोन्मिषता हम ज्ञानाख्येन बलेन च।
सौभाग्यो स्वर्ग्यलाभ: स्यात् पुदात प्रवेशनम् ॥१०७॥
अनुसंधानमेतत्तेन तत्र स्थितिर्यदा।
तदा गर्भीकृताशेषवैश्वाकारनिजस्थिति: ॥१०८॥
सम्यगुच्छूनतारूपोल्लसिताहंकाररूपक: ।
प्रोन्मेष: सूक्ष्मवाग्रूप: सोऽनभिव्यक्तवर्णक: ॥१०९॥
हकाराद्यर्धवृत्तियोगाद्भवेन्मन्त्रोदय: स्फुरन्।
स एव वीर्यानुभवो मान्त्र: साधक सिद्धिद: ॥११०॥

सामान्यचित्प्रकाशैकस्वरूप प्रतिपादकम्।
शिवसूत्रप्रकरणं समाप्तमिदमादिमम् ॥१११॥
अत: परतरं मान्त्रं स्वरूपमुपवर्ण्यते।
वक्ष्यमाणप्रकरणे विद्योदयसमन्वितम् ॥११२॥

(सामान्यचित्प्रकाशस्वरूपनिरूपणाख्य: प्रथम: प्रकाश:)

अथ
सहजविद्योदयाख्य:
द्वितीय: प्रकाश:

उक्तक्रमेण शिवतां सर्वज्ञानक्रियावत: ।
उपायाद्यात्मनस्तत्र मान्त्रं वीर्यं च यादृशम् ॥१॥
पुनरत्र वक्तव्यं मन्त्रवं रूपमेव यत्।
कोऽसौ मन्त्रो यस्य वीर्यं तदर्थं भगवानाह:
चित्तं मन्त्र: ॥१॥

चित्तमेव शिवो ज्ञेयः प्रमाता निरुपाधिकः ।
सर्वज्ञतादिगुणवान् दिक्कालकलनोज्झितः ॥३॥
स्वात्मानुभवधर्मित्वात् स मन्त्र इति गीयते ॥१॥

तत्कथं योगिनां सिद्ध्येत्तदाह परमेश्वरः ।

प्रयत्नः साधकः ॥२॥

चित्तरूपसमावेशे प्रयत्नोऽतिशयः स्मृतः ॥४॥
इच्छात्मवीर्यवृत्तासौ पुनःपुनर्निभालनात् ।
स एव साधकस्तत्र प्रकृष्टः परिकीर्तितः ॥५॥

चित्तत्वमात्मनः सिद्धं वक्ष्यमाणनयेन च ।
त्रिकसारे परसहस्रे शिवेनैव निरूपितम् ॥६॥
चिन्त्यते स्वस्वभावो यः स मन्त्रः परिगीयते ।
यन्नैरन्तर्यमननाद्योगी रुद्रशिवावतिः ।
यस्मात्परमार्थज्ञा योगिनो योगचिन्तकाः ॥७॥

एवमादिश्य भगवान्वाचकानां स्वरूपकम्
वाच्यवाचकयो रूपमभिन्नं भेदयोगि वा ॥८॥
स्यात्तदर्थं प्राह सूत्रं च तदर्थप्रकाशकम् ।

विद्याशरीरसत्ता मन्त्ररहस्यम् ॥३॥

शुद्धे चिन्मात्रतत्त्वादुन्मेषः सहसैव यः ॥९॥
स्वप्रकाशात्मिकास्फाररूपा सा विद्येति निरूपिता ।
शरीरसत्ता सा मन्त्री रहस्यं परमं च तत् ॥१०॥

एवं स्थिते रहस्येऽस्मिन् मन्त्ररूपे यथायथम् ।
एष यो देहिभिर्मन्त्र उदयः परमोदयः ॥११॥
कथं स्यादत्र च विभुः सूत्रमाह यथार्थवत् ।
गर्भे चित्तविकासो विशिष्टोऽविद्यास्वप्नः ॥४॥
प्रकाशानन्दसारान्तर्व्यावर्तनबलात् भृशम् ॥१२॥
विदधेन्यो निवृत्तस्य मन्त्रसच्चिन्मयी स्थितिः ।
यतो विकासश्चिच्चन्द्रचन्द्रिकामृतनिर्भरः ॥१३॥
स्वच्छन्दात्मामृतापूरप्लुतानन्दजगन्मयः ।

तदसत्त्वादविद्यायाः प्रथयन्त्या परादिभिः ॥१४॥
तत्त्वजालैरसंख्यातैर्युक्त्या स्वप्नो विलोपनम् ।
तदेवं सति विद्यैव यथावत्प्रतिपादिता ॥१५॥
सोपायेयमतः सर्वमन्त्रमुद्रास्वरूपिणी

मान्त्रं वीर्यं तत्स्वरूपं तद्विमर्शो तथोदयम् ॥१६॥
प्रतिपाद्य पुनर्मुद्रातीर्यर्थं प्राह शंकरः ॥
विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था ॥५॥
स्वालोकलक्षणा शुद्धा यैव विद्या निरूपिता ॥१७॥

समुत्पातं तदुदयो यथावत्प्रागुदीरितम् ।
स्वाभाविकं स्यात्सहजं बलमात्मन्यकृत्रिमम् ॥१८॥
तदेवं सति तस्मिंस्तन्मुद्रावीर्यं विजृम्भते ।
खेचरी सा शिवावस्था शिवव्योम्न्युदिता यतः ॥१९॥
खे क्वचिद्गगनाभोगे चरणात्खेचरीति सा ।
ध्येयानुकारतादात्म्यप्रतिपत्त्युदयात्मिका ॥२०॥
अत एव शिवावस्था स्वरूपावेशशालिनी ॥५॥

एवं मौद्रे च मान्त्रे च वीर्यं स्यादेकरूपकम् ॥२१॥
कार्यभेदाद्द्वयोर्हि बाह्यार्थप्रतिपत्तितः ।
अतो मुद्रामान्त्रवीर्यव्याप्त्युपायार्थमाह च ॥२२॥

गुरुरुपायः ॥६॥

प्राप्तावत्र गुरुः शक्तिरुपायः परमः स्मृतः ।
यतः सा शाम्भवी शक्तिरनुग्रहकरी सदा ॥२३॥
उत्पाताद्धर्षितो जन्तुः क्रियते भवनिःस्पृहः ।
तदधिष्ठितदेहोऽसौ नीयते सद्गुरुं प्रति ॥२४॥
वक्तृत्वात्तात्त्विकार्थानामुपेयपदलम्भनात् ।
गुरुरौन्मनसे धाम्नि विश्रान्तिपथदर्शकः ॥२५॥

एवं गुरौ प्रसन्ने तु किं भवेत्तत्प्रदर्श्यते ।

मातृकाचक्रसंबोधः ॥७॥

स्वाभासा मातृका ज्ञेया क्रियाशक्तिः प्रभोः परा ॥२६॥
तस्याः कलासमूहो यस्तच्चक्रमिति कीर्तितम् ।

तस्य सम्यक् परिज्ञानं यत्संबोध्य च इष्यते ॥ २७॥
सन्ति तेन विवर्तौ यौ वाच्यवाचकलक्षणौ ।
क्रियाशब्दः मुदितत्वात्स भिन्नोऽभिन्नः सदा यतः ॥ २८॥
नित्योदितोऽस्तमितप्रकाशवपुषः पुरा ।
वीर्योन्मुखत्वात्प्रमोहिन्धाशकेः समुदयो भवेत् ॥ २९॥
ततः संवेदनस्पर्शौ प्रादुर्भूतौ ततः पुनः ।
सर्वार्थप्राणआसश्च ततो ध्वनिरनाहतः ॥ ३०॥
पदवाक्यार्थगर्भः स्यात्ततः प्राणात्मिका क्रिया ।
पश्चाद्वर्णगर्भा वाक् ततः सर्वस्य संभवः ॥ ३१॥

मन्त्रादिवस्तुजातस्य मूलमेकं ततः स्मृता ।
मातृकैव क्रियाशक्तिः शिवस्येत्थं विजृम्भते ॥ ३२॥
मातृकाचक्रसंबोधः एवं जातो यदा तदा ।
यद्यहिके प्रबुद्धः सन् प्रभुर्मन्त्रेन्द्रतामियात् ॥ ३३॥
मन्त्रेश्वरात्

भस्मसाद्भवति
इत्थं प्रज्वालिते मान्त्रे तेजसि प्रज्वलत्यलम् ।
कर्म पुनर्भवकरं वदन्त्यत्राह शंकरः ॥ ३४॥

शरीरं हविः ॥ ८॥

ज्ञानानले प्रज्वलिते मन्त्रनादात्म्यलक्षणे ।
शरीरं प्रज्वालयेत भौतिकं कर्मबन्धनम् ॥ ३५॥
हविर्भूतमतश्चाथ दिव्यदेहोऽवतायाद्यतः ॥

एष एव परो देहो यजमानस्य चिद्विभोः ॥३६॥
निर्गले महासत्त्वे नित्योदितमहानले ।
यद्धर्णं शरीरादेर्भावजातस्य सर्वदा ॥३७॥

एवं परं ज्ञानकायस्थितस्यान्नं किमाह च ।

ज्ञानमन्नम्[१०] ॥ ९ ॥

ज्ञानमत्र परं सम्यगुक्तं प्रकरणद्वये ॥३८॥
तदेवान्नमिव ज्ञेयं परितृप्त्युपपादकम् ।
यतः प्रपूर्णतैव स्यादसकृत्तन्निभालनात् ॥३९॥

तदेवं सति विद्यायाः संहारस्तेन किं भवेत् ।
तदर्थं चास्य नियत्यै स्वप्नोऽमाहात्म्यार्चितः ॥४०॥

विद्यासंहारे तदुत्थस्वप्नदर्शनम्[११] ॥१०॥

संहारवेदती विद्या सविशेषा निरूपिता ॥४१॥
तस्याः संहार एव स्यात्स्वप्रकाशोदये सति ।
संहारे सत्यविद्योत्थं भावजातं विमोहकम् ॥४२॥
स्वप्नरूपं स्मृतं तस्य दर्शनं प्रत्यवेक्षणम् ।
इत्येवं परमेशेन संगृह्य च निरूपितम् ॥४३॥

प्रबुद्धता वृत्त्युदये सा निरूढा बुधानां स्थितिः ।
स्वालोककलनात्मत्वं द्वयैक्यं नित्यतृप्तता ॥४४॥

द्वितीयमेतत्सहजविद्योदयनिरूपकम् ।
शिवसूत्रप्रकरणं समाप्तमिति सांप्रतम् ॥४५॥
प्रवक्तव्यमतश्चात्र विभूतिस्पन्दलक्षणम् ॥
ज्ञानयोगबलप्राप्तौ चिन्तामणिरिवापरः ॥४६॥

(सहजविद्याख्यो द्वितीयः प्रकाशः ॥२॥

अथ

विभूतिस्पन्दाख्यः

तृतीयः प्रकाशः

स्वरूपप्रत्यभिज्ञानान्मन्त्राच्च सहजोदयात् ।
विभूतयः प्रवर्तन्ते कीर्त्यन्ते ताश्च सांप्रतम् ॥ १॥
पूर्वापरविमर्शेन यो बोधोऽस्य विजृम्भते ।
तद्विकासादविच्छिन्नपरानन्दः स्वयं भवेत् ॥ २॥
येनाखण्डितस्वातन्त्र्यशक्तिः स्वाभाविकी स्फुटा ।
विभूतिः प्रथते, खण्डं समाचष्ट तदर्थकम् ॥
तत्र चित्तात्मनः सर्वं प्रत्यवेक्षार्थमावदत् ॥ ३॥

आत्मा चित्तम् ॥१॥

1
मनः पर्यायमाख्यातं चित्तं सर्वत्र शासने ।
इन्द्रियत्वात्स संकल्पः स्यात्तु मन्त्रस्तदुच्यते ॥४॥
आत्मैव चित्तं विज्ञेयं रागादिरहितं यदा ।
तदा मन्त्रः स विज्ञेयः संकल्पानुविधायकः ॥५॥
नैव संकल्पसिद्धिः स्यात्स्वरूपानिमीलनात् ॥१॥

कुतश्चित्तस्य संकल्पसिद्धिर्नास्ति तदाह च ॥

ज्ञानं बन्धः ॥२॥

2
ज्ञानं विषयसंश्लेषाद्रागादिकलिलक्षणम् ।
तदेव बन्धश्चित्तस्य स्वरूपावरणात्मकम् ॥६॥
अन्तर्बहिश्च विषयाऽनासक्त्याभ्यासपाटवात् ।
यदा मन्तव्यता तस्य तद्द्रष्टा मुक्त एव हि ॥७॥ ?
[७- मन्तव्यता - मन्त्रात्मकता, तस्य - चित्तस्य, द्रष्टा - आत्मैव, एव - तदा न बन्धः]

इत्थं नित्यस्य च ज्ञप्तुः किमावरणमुच्यते ॥

कलादीनां तत्त्वानामविवेको माया ॥३॥

कलादिक्षितिपर्यन्तस्तत्त्वग्रामोऽस्य सोच्यते ।
ततस्तैर्जगत्सर्वमतस्तत्त्वानि तत्र च ॥
कला कर्तृत्वसामर्थ्यं किंचिन्मात्रं प्रकीर्तितम् ।

तादृशं ज्ञानसामर्थ्यं विद्यातत्त्वमिति स्मृतम् ॥
इदमेवेदमस्तीत्थं रागः पाशोऽस्ति बन्धनम् ।
इदानीं तनभावेऽस्मिन् कालोऽत्याकलनं मतम् ॥
नित्यत्वं कर्मफले नियत्यात्मकतात्मनः ।
समदुःखसुखात्मानन्तस्तत्त्वे प्रधानता ॥
सुखदुःखविमोहित्वं गुणाः स्युर्मन्तृता च धीः
संरम्भत्वमहंकारो मनश्चाक्षप्रयोक्तृता ॥
अक्षविशेषितं ज्ञत्वं बुद्धीन्द्रियगणः स्मृतः ।
तैरेव भिन्नं कर्तृत्वं कर्मेन्द्रियगणस्त्वयम् ॥
शब्दमात्रावभासित्वं तन्मात्रकगणस्तथा ।
भिन्नशब्दादितोद्वृत्तं गणः स्यात्पञ्च भौतिकः ॥

एतेनामविवेको यः सा माया मोहिनी यतः ।
विवेकः पुनरत्रैव शुद्धविद्यादिसंश्रितः ॥
अतः शुद्धानि तत्त्वानि कथ्यन्ते तत्त्ववेदिभिः ।
स्वज्योतिष्ट्वं शिवं तत्त्वं दृक्क्रिये शक्तिरुच्यते ॥
सर्वज्ञानक्रियात्वयोऽन्यता स्यात्सदाशिवः ।
धैर्यत्वमैश्वरं तत्त्वं तद्द्वारा भेदना यतः ॥
शिवज्ञास्त्रादिबोधभृत्त्वं विद्या शुद्धेह कीर्तिता ।
रूपमात्मन्यवस्थाभिरेताभिस्तत्त्वकल्पना ॥
तत्त्वानां तदवस्थात्वमुच्यमानं न दुष्यति ।

सर्वानुस्यूतरूपत्वाद्विमर्शः परमस्ततः ॥

इत्थं तत्त्वात्मककलारूपं प्रसरमात्मनः ।
निरूप्य पुनरप्याह तत्संकोचाद्यथोदयम् ॥

बोधात्मके का देहे कारणक – शरीरे संहारः कलानाम् ॥ ४ ॥

तत्त्वानां यत्स्वसामर्थ्यं कलास्ता परिकीर्तिताः ।
तत्संघातः शरीरं स्यात्सकलत्वमतोऽस्य तत् ॥
आधारे आत्मनस्तत्र कलानां कारणात्मनि ।
स्वके स्वकेऽनुप्रवेशः संहारः परिकीर्तितः ॥
एवं यावद्बोधदेहप्राप्तिस्तत्रोदयः परः ।

अथोल्लङ्घनवृत्त्या वा शिवतत्त्वावलम्बनम् ॥
तत्र संहार एव स्यात्कलानां, तेन चोदयः ॥ ४ ॥
→ शिवत्वावस्थ

तत्त्व प्रसरसंकोचस्वरूपेऽपीत्थमात्मनि ॥
वृत्त्युल्लङ्घनयोगेन स्वस्वरूपोदयं शिवः ।
प्रतिपाद्य पुनः प्राह भूतसिद्ध्युदयः कथम् ॥

नाडीसंहार – भूतजय – भूतकैवल्य – भूत –
पृथक्त्वानि ॥ ५ ॥

चिदाधारे शरीरेऽस्मिन्संस्थिते पाञ्चभौतिके ।
स्वातन्त्र्यादात्मनः स्वाम्यं गृहे गृहपतेर्यथा ॥

चिदात्मनि

तत्र चिदाकाशे लयान्नाडीसंहार उच्यते ।
यतः सर्वत्र सर्वासां नाडीनां मुख्यमुच्यते ॥
नाड्या धारा वायवः स्युस्तदाधारश्च चिद्विभुः ।
तस्य तत्तिलयान्मध्ये षड्गुणा वृत्तिरुत्तमा ।
स्थिरद्रवौष्ण्यचलता सौषिर्यं विवरीतता ।
तत्त्वरूपमथवा स्थानलक्ष्यप्रभेदतः ॥
विभावयन्भूतजयः स्यात्प्रबुद्धस्य च यमी: ।
तन्निरासात एवास्य कैवल्यमनुबाधिकम् ॥
षट्त्रिंशत्तत्त्वसामर्थ्ययुक्तं भूतं पृथक् पृथक् ।
करोत्यात्मबलस्फीतात्स्वविवर्तविवर्तनात् ।
संघातस्थमपात्मस्थं विकरोत्यथवा विभुः ।
प्रभुशाली स्वतः सेयं सर्वत्रा स्वाण्डतात्मनः ॥
[भूतजयः - भूतजयः तत्त्वस्वरूपं विभावयंस्तस्य भवति ।
सच भूतानां चिद्रूपता विमर्शः ।
भूतं पृथक् पृथक् - पृथक् पृथग्भूतं भूतं विवीभावयति ।
षड्दर्शीत्या ।

तथास्यस्यात्मनो मोहे बहुशास्त्रे विवर्धति ।
स्वरूपासिद्धिरस्य स्यात्तत्स्फुटा प्राह शंकरः ॥

मोहावरणात्सिद्धिः ॥ ६ ॥
कामक्रोधलोभहर्षभयत्राससमदोद्गमे ।
प्रहर्षदर्पे च सर्वत्र मोह एव विजृम्भते ॥
तदेकावरणं ज्ञेयं स्वरूपाच्छादकत्वतः ।
हेतुभूतात्तस्तस्मात्प्राक्कोटि प्रतिमर्शितः ॥
सिद्धिः स्यादात्मनः सर्वज्ञत्वकर्तृत्वलक्षणा ॥ ६ ॥

सति मोहे सिद्धिरेवं तज्जयात्स्यात्किमाह तत् ॥
मोहजयादनन्ताभोगात्सहजविद्याजयः ॥ ७ ॥

बहुशारवो भेद उत्कर्स्तज्जयः सुप्रबुद्धता।
नित्यं स्वालोकवशतस्तत्त्वसंकुचितचिद्गते ॥
तस्मादनन्ताभोगाख्यात्स्वप्रकाशोदयः स्फुरन्।
जयस्यानन्तता यस्माद्बहुशारवो विजृम्भते ॥
स एवागोण इत्युक्तः परिपूर्णस्वरूपतः।
स्वप्रकाशात्मिका विद्या सहजा प्रागुदीरिता ॥
उद्भवः प्रोद्गमस्तस्यास्तेनात्मलोक उत्तमः ॥

एवं सिद्ध प्रबुद्धः संस्थितो नित्यमतन्द्रितः।
एकत्रारोपयन्सर्वं तदर्थं प्रोक्तवानजः ॥

जाग्रद्द्वितीयकरः ॥८॥

ज्ञातं जाग्रदिति प्रोक्तं तेनालोक्य स्वगोचरम्।
आपाद्यदेकतः सर्वं ततो भेदबहिष्कृतम् ॥
प्रबुद्धः सर्वदा तिष्ठेद्योगिराड् भेदवर्जितः।
करतलकर एवातो जाग्रदादानगौरवात् ॥

अत एव द्वितीयत्वं विचित्रत्वादुदीरितम् ॥८॥

इत्थं नित्यप्रबुद्धस्य मोक्षलक्ष्मीर्विरोधिता।
शरीरमाश्रयत्येव जीवन्मुक्तस्य सर्वदा ॥
अतः परानन्दरसक्षीव आत्मा सदा कथम्।
चेष्टते सूत्रमाचष्ट तदर्थं चन्द्रशेखरः ॥

नर्तक आत्मा ॥ ९॥

रस,भाव,नय,अभिज्ञो वागङ्गाहार्यसत्त्वयुक्।
यद्वत्प्रौढनटः सम्यगनुगन्ता प्रकीर्तितः ॥

तद्रूपात्मा स्वरूपेण स्फुरन्स्फुरति सर्वतः ।
तत्तद्भावरसावेशात्तत्तच्चेष्टाविलासवान् ॥
स नर्तकः स्मृतो यस्मात्सर्वावस्थावलम्बकः ॥

नृत्यतोऽस्यात्मनः सम्यगाधारार्थमतोऽवदत् ॥

रङ्गोऽन्तरात्मा ॥१०॥

बहिरन्तर्भेदभाज्योऽयमात्मा नर्तक उच्यते ।
तस्यैवान्तर्निभेदो यः सोऽन्तरात्मा प्रकीर्तितः ॥
स एव रङ्ग आख्यातः पृथक्कसमाश्रयं ।
प्रवृत्तिस्थितिसंहारैर्नृत्यतीवात्र चिद्विभुः ॥१०॥

एवं सतीन्द्रियगणस्तस्याच्छादको भवेत् ।
तदर्थं पुनरप्याह सूत्रं कान्तार्धदेहभृत् ॥

प्रेक्षकाणीन्द्रियाणि ॥११॥

सुप्रबुद्धः स्वतन्त्रश्च चिदात्मैव यतः परः ।
तत्सामर्थ्यादिन्द्रियाणि चेष्टन्ते स्वासु वृत्तिषु ॥
प्रेक्षकाणीव तान्यत्र चिद्विभोः परिनृत्यतः ।
स्वरूपावरणे चास्य तानि न प्रभवन्ति हि ॥११॥

तदेवं सति यद्बुद्धिवशात्सर्वोत्कटः पुमान्।
प्रभवत्येव भगवांस्तदर्थं सूत्रमुक्तवान्॥

धीवशात्सत्त्वसिद्धिः ॥१२॥

१२ शब्दादिविषया वृत्तिश्चिद्रूपाभिनिवेशिनी।
यदा भवेत्तदा बुद्धिस्तत्रैवाध्यवसायिनी॥
पूर्वं भवत्यतः शुद्धा सैव धीशक्तिरुच्यते।
त्येकाशयत्वात्सत्त्वस्य भित्तिः सोऽप्यपिरुच्यते॥
तद्वशात्सत्त्वसिद्धिः स्यादत एव निरूपितम्॥

इत्थं सति स्वतन्त्रत्वमात्मनः स्यादतोऽवदत्।

सिद्धः स्वतन्त्रभावः ॥१३॥ १३ प्रोक्तरीतितः

स्वातन्त्र्यमप्यस्य संसिद्धमात्मनः
सर्वज्ञत्वक्रियावत्ता शरीरेऽस्मिन्यथा तथा॥
सर्वत्र स्यान्न वा तत्र ह्याहात्र शशिभूषणः।

यथा तत्र तथान्यत्र ॥१४॥

१४ आत्मनाधिष्ठिते देहे यद्वत्सर्वज्ञतादयः।
स्फुरन्ति तद्वत्सर्वत्र स्वाधिष्ठानबलेन च॥ १४॥

कर्तुरेवं स्वातन्त्र्यस्य विश्रान्तोऽन्यपुरादिषु ॥
तस्मिन् पहितस्यास्य स्यादकालपदस्थितिः ।
कथं ? तदर्थं कालारिः प्राह सूत्रं यथार्थवत् ॥

विसर्गस्वाभाव्याद्बहिःस्थितेस्तत्स्थितिः ॥१४॥

सृष्टिः स्वभावाच्चिद्रूपात्प्रवृत्तिकलनात्मना ।
जातस्य कालवपुषः स्पन्दस्यैवात्र चित्पदे ॥
जन्म न स्यात्संकलनात्तस्य संकल्पजस्य च ।
बहिर्बाह्यपदार्थानां पृथक्संस्थित्यभावतः ॥
प्रकाशमानां प्रकाशैक्यभावतामुपसेविताम् ·
[विसर्ग - विसर्गस्यापि स्वभावतः, प्रकाशैकरूपत्वात् ।
अथवा विसर्गस्य परमेश्वरस्वभावत्वेन, परमेश्वरात्-
मकत्वात् ।... स्थितेः - प्रकाशाद् बहिः स्थितेः
स्वशक्तितो वा कालकलिते स्वरूपे तस्य सृष्टपदार्थस्य
स्थितिर्यतोऽङ्गीकृता । स्थिति - अकालकलिते प्रकाशे
तस्य स्वप्रथमानतयान्तः सृष्टस्य स्थिति ।]

स्वतःस्वाभाव्यतः प्रच्यवनं नास्ति, पौनःपुन्यभालनात् ।
अकालकामजा सैव स्यादकालपदाश्रयात् ॥१५
[सैव - बहिः सृष्टपदार्थानामन्तः सृष्टिः ।]

अकालपदसंप्राप्तौ यो हेतुस्तमतोऽवदत्

बीजावधानम् ॥१५॥

बीजं सर्वस्य जगतश्चिदात्मैव परं स्मृतम् ।
अवधानं तद्विमर्शः सावधानेन चेतसा ॥१६
तदाऽकालपदप्राप्तिर्मोक्षोऽग्रहहानितः ।

सर्वभावोद्भवभुवः प्रवेशोऽन्तश्चिदात्मनः ॥
कथं पुनर्योगिवृत्त्या स्यादत्र प्राह शंकरः ।
आसनस्थः सुखं ह्रदे निमज्जति ॥१६॥
पवमानः शुचिश्चण्डो मध्यमः प्राण आसनम् ।
यैतकं ज्ञानरूपिण्या सन्मत्स्यबलकात्मना ॥
१. - पूर्वमुक्तं, च तत्रस्थः सुखं मज्जति तद्ध्रदे, ।
ह्रदत्वमत्र प्रागुक्तं, सर्वभावोद्भवत्वतः ॥
चिद्रूपस्य च बीजत्वमत एव निरूपितम् ।
अवधानानुप्रवेशात्तत्रोपायावुदाहृतौ ॥
कालकामजयायैवमजामरपदाप्तये ॥१६॥

एवं कर्तृत्वविश्रामस्तत्त्वानन्द्यमस्खलितम् ॥
तेन कर्तृत्वमस्य स्यात्तदाह वृषलाञ्छनः ।
स्वमात्रा निर्माणमापादयति ॥ १७॥
स्वा शक्तिः परमेशस्य ज्ञत्वकर्तृत्वलक्षणा ।
यावद्वीर्यं बलं तस्य भवद्भवकारणम् ॥
अतश्च सा जगन्माता तस्य शक्तिमतः परा ।
तया स्वमात्रा निर्माणं यथास्वं रोचते विभोः ॥
तथा संपादयत्याशु तत्स्वातन्त्र्यबलाद्बलम् ॥१७॥

एवमस्य च तद्रूपं तदा बुद्ध्या मलावृतम् ॥
तद्विनाशात्पुनर्जन्म न भवेत्तत्र चावदत् ।
विद्याविनाशे जन्मविनाशः ॥ १८॥

सौपाधिका वेदनीया पदार्थविषयैव या।
अशुद्धा सा स्मृता विद्या पुनः संभवकारणम्॥
स्यात्तद्विनाशः सहज विद्योदयतिभालनात्।
सति तेन (तस्मिन्) स्वतन्त्रत्वव्यक्तिः स्यादात्मनः परा।
अत एव पुनर्जन्म न भवेत्स्वबलाश्रयात्॥
जीवन्मुक्तिरियं सिद्धिरकालपददायिनी॥

वेदनीयपरा चेयं बाह्यार्थोपाधिरञ्जनात्।
विद्या तत्त्वेऽस्ति हेतुः क इत्यत्रोक्तवानजः॥
कर्मादिषु माहेश्वर्याद्याः पशुमातरः॥१६॥
सर्वात्मकस्वरूपस्य शब्दराशेः कलामयम्।
यद्रूपं वर्गमादिष्टं पशोः शब्दानुवेधतः॥

प्रत्ययोत्पादकं सम्यक् तद्द्विरूपं प्रकीर्तितम्।
बीजयोनिप्रभेदेन तत्र बीजं शिवः स्वयम्॥
शक्तिर्मायाभिधा योनिः कादिक्षान्ताष्टवर्गिणी।
माहेश्याद्यष्टकं तत्र परापरफलप्रदम्॥
अधिष्ठाय पशूनां च बाह्यार्थावगमे स्थितम्।
मिश्रकर्मफलासक्तिजनकं घोरलक्षणम्॥
विषयासक्तचित्तानामधोऽधः पातकारकम्।
घोरघोरतरं तस्मादघोरं शिवदायकम्।
एवं मात्राष्टकं चैतत्प्रतिवर्गं त्रिभेदवत्।
आदि कों – वर्गे वर्गे भैरवता संस्थिता शैवदायिनी॥

तदेवं शब्दराशिश्च त्रिस्वरूपो ऽष्टवर्गजः।
उच्चारस्यादिमध्यान्त भेदा वर्णव्रजेऽपि च॥
तत्राभेदेन शिवता यथा स्यात्प्राह तत्तथा।
त्रिषु चतुर्थं तैलवदासेच्यम् ॥२०॥
उक्तेषु मातृमेयेषु त्रिषु वर्णात्मकेषु च।
योऽवशिष्यत एवात्र चतुर्थः स शिवः परः॥
सोऽनुसंधेय आसेच्यस्त्रिषु तैलवदम्भसि।
तदनुस्यूतरूपत्वात्स्यात्सिद्धि[२१]रनपायिनी ॥२०॥

अत्र वर्णानुप्रवेशे क उपायस्ततोऽवदत्।

मग्नः स्वाचेत्तेन् प्रविशेत् ॥२१॥
बाह्यार्थाकारता ह्येवं प्रवृत्तिं भजतो विभोः।
पूर्ववृत्त्युदयेनालं तत्प्रत्याहृतियोगतः॥
स्वात्मन्येव निमग्नः स्यात्प्रवृत्त्युपरमे सति।
एवं निमेषवशतः शिवो भूत्वा स्वचेतसा॥ चित्तेनैव
अङ्कारकल्पवर्णानां बहिर्नवचान्तरं विशेत्।
पुनर्भैरववृत्त्यैव मन्त्राणां प्राणनं परम्॥
न केवलं यावदयं विधिः परपुरादिषु।
इत्थं सति च मन्त्राणां शिवभैरवता स्फुरत्॥
स्फुरत्येकान्यथा कस्मात् वर्णात्मा मन्त्र ईश्वरः ॥२१॥

तदेवं वर्णमात्रस्य पूर्वापरनिरासतः।

स्थितत्वादिति भवत्याह तदर्थं सूत्रमीश्वरः ॥

मध्येऽवरप्रसवः ॥२२॥

वर्णस्योच्चार्यमाणस्य पूर्वमध्यान्तलक्षणम् ।
भागत्रयं यत्तत्रादिपर्यन्ते शिवरूपता ॥
संस्थितैकैव भूधाख्य विश्वभाख्यस्वरूपतः ।
मध्ये च प्रसवो भ्रंशः स्यात्कश्चिद्वर्णमात्रके ॥
पत्युः शाक्तं स्फुरद्रूपमेतदेवोपदिश्यते[23] ॥२२॥

इत्थं सति त्रिस्वरूपे यथा साम्यं भवेत्फलम् ॥
तथा प्रदर्शयन्नाह पार्वतीपतिः पुनः ।

प्राणसमाचारे समदर्शनम् ॥२३॥

सर्वज्ञानक्रियारूपं यत्स्वसामर्थ्यमुत्तमम् ।
स प्राणः परनादाख्यः सर्वानुप्राणनक्षमः ।
तत्समाचार आवेशो वर्णशब्दानुषु स्फुरन् ।
तेनाभेदस्यानुभवः समदर्शनमुच्यते ॥
स्वं तद्बलमाक्रम्य सर्वज्ञानबलान्विताः ।
वर्णमन्त्रादिकाः सर्वे भवन्तीति किमद्भुतम्[24] ॥२३॥

वर्णानुप्राणनं शंभुर्निरूप्याह प्रसङ्गतः ।
यथा भावशरीरादेः स्यादनुप्राणनं तथा ॥

मात्रास्वप्रत्ययसंधाने नष्टस्य पुनरु-
-त्थानम् ॥ २४ ॥

मायाध्वनि पर्यन्ततत्त्वग्रामकलास्तु याः ।

ता मात्रा व्यक्तये याश्च प्रतितत्त्वं स्वगोचरे ॥
तासु स्वप्रत्ययं ज्ञानं शक्तित्वं तेन स्फुरणम् ॥
अनुसंधानमेतत्तत्त्वेऽस्तु तदभ्युपायकम् ॥
सति तस्मिन्विनष्टस्य भावादेरुदयः पुनः ।
एवं कर्तृधरावेशबलतो यत्र यत्र च ॥
मात्राप्रत्ययसंधानं कुर्यात्तत्कर्तृता भवेत् ।
सर्वज्ञ सर्व कर्तृत्व बलावेशदृढस्थितिः ॥ २४ ॥

य एवं नित्ययुक्तः स भवेत्कीदृक्तदाह च ।

शिवतुल्यो जायते ॥ २५ ॥

सर्वस्मिन्कारणकुले शिवः शिरसि वर्तनात् ।
सदा निरुपधिज्योतीरूपत्वाच्चित्स्वरूपतः ॥
तत्तुल्यो नित्ययुक्तत्वात्कुर्वन्नपि विचेष्टितम् ।

जीवन्मुक्तः साधकः स्यात्पूर्णैकज्ञानवीर्यतः २६ ॥२५॥

एवमभ्युद्यतभावस्य कीदृशी नित्ययुक्तता ।
तदर्थं भगवान्सूत्रमाह व्रतनिरूपकम् ॥

शरीरवृत्तिर्व्रतम् ॥ २६ ॥

शरीरमेव कङ्कालं कपालं कुङ्कुरस्थितम् ।
दृष्टदण्डं दण्डमत्र करपादगलास्थिताः ॥
अस्थिखण्डाः पञ्च मुद्रा भस्म दीप्तिः परा स्मृता ।
गुणत्रयं चोपवीतं ध्वजिका स्यान्महाव्रतम् ॥
भूषणानीन्द्रियाण्यत्र विहृतिर्विषयेष्वलम् ।
देहश्मशाने सदासक्तिः कामचारचेतसा स्फुरन् ।

यो यश्चेष्टापरिस्पन्दो वीरेशस्योत्सवः सदा।
महाव्रतमिदं ज्ञेयं निरर्गलनिजस्थितेः॥ [२६]

इत्थं व्रतधरस्यास्य जपः कीदृक्तदप्यहो च।

कथा जपः ॥२७॥

यद्यत्कर्तृपदारूढः प्रबुद्धः सन्प्रभाषते।
तत्तज्जपः स्यादव्रतिनः स जपात्पुरुषोत्तमः॥
दीर्घावलम्बनोच्चारसंचाराख्या कथा जपः
एवं चतुर्धा विज्ञेयः शाक्तो हंसश्च पौद्गलः॥
[निष्कलोऽप्यथ] शाक्तोऽत्र पिण्डस्था [हं] क्रियोचितः
ओँ

ॐ हंसः
निष्कलः प्रणवाङ्कस्थो हंसो नादकलात्मकः॥
सोऽहं जीवसंज्ञो मरुद्रूपः स्वच्छ्वासायुतद्वयम्।
सहस्रं षट्शतान्येव वहत्यच्छिद्रसंततिः॥ [२९]
२७॥

य एवं ज्ञानवान्सिद्धो जपव्रतपरायणः।
केन दानेन तेनेह भाव्यं तत्राह शंकरः॥

दानमात्मज्ञानम् ॥२८॥

आत्मस्वरूपप्रत्यभिज्ञानं तत्परमुत्तमम्।
उक्तं च वक्ष्यमाणं च तस्य सम्यक्प्रकाशनम्॥
शक्तिपातप्रबुद्धानां यत्प्रदानमिहोत्तमम्।
तथा नात्मार्पणं सम्यक्प्रदानं स्यात्पदोत्तमः॥

दीक्षाशब्द इह प्रोक्तो दानक्षपणलक्षणः (२९) ॥२८॥

एवं सृष्टिस्थितिध्वंसरतानु यद्विभुः।
आत्मैव शिवरूपत्वात्तत्स्वरूपं निरूपणे।
सूत्रे व्यस्तं समस्तं च प्रोवाचेन्दुकलाधरः
प्रत्यक्षतन्त्रे [वृत्तिसमासशैकम्]

योऽविपस्थो ज्ञाहेतुश्च ॥२९॥

[(यो) योनित्वेन च विश्वस्य (वि) परे (पु) एव स्थितः (स्थः) प्रभुः।
व्यस्तं (ज्ञा) ज्ञानक्रियात्मा हेयस्य (हे) तुच्छीकरणहेतुतः (तुः) (हेतुः)॥
अतो योगी विश्वरूपपदस्थो ज्ञानपूर्वकः।
हेतुर्मार्गस्य (तु मार्गस्य) मोक्षस्य (च) प्रकृष्टः प्रतिपादितः॥

य एवं योगिराट् सम्यक्त्रिशाभिनिवेशतः।
सम लब्धस्थितिः सोऽविपस्थस्तज्ज्ञाने हेतुरुत्तमः॥
[हेतुश्च – अविवालिकासु मातृषु व्यापकत्वेन स्थितः
तज्ज्ञानहेतुश्च]

अत्र ये पशवस्तेषु पतिर्मातृगणः (अवीनां कालयिता) स्मृतः।
तत्स्य आत्मा प्रस्फुरति तेन चक्रेश्वरस्त्वसौ॥
इत्थं चिदीश्वरस्यैता वृत्तयो रश्मयः स्मृताः।
शब्दादिविषयैर्भोगैः रञ्जयन्त्यः सदा स्थिताः॥
एतन्मातृगणज्ञानमत्र हेतुः स्वचिद्विभुः ॥२९॥

एवं शक्तिमयस्यास्य विश्वाकारत्वमाह तत्॥

स्वशक्तिप्रचयोऽस्य विश्वम् ॥३०॥

एवं शक्तिमतश्चास्य शक्तयः स्वाश्चिदादयः।
तासां नवनवोल्लासस्पन्दा ये प्रचयाः स्मृताः॥
त एव विश्वं विज्ञेयं यतः शक्त्यात्मना विभुः।
जगद्रूपः प्रस्फुरति स्फुरन्नेवात्मना सदा[३१] ॥३०॥

एवं सृष्टिकृदेवात्मा स्थितिकृल्लयकृद्यथा।
तथा प्रदर्शयन्नाह सूत्रं त्रिपुरसूदनः॥

स्थितिलयौ ॥३१॥

तैरेव शक्तिप्रचयैर्वृत्त्युल्लासस्वरूपकैः।
चिदात्मैव स्थितिलयौ प्रकरोतीति निश्चयो[३२]॥३१॥

एवं सृष्टिस्थितिध्वंसकालेऽप्यात्मा निजस्थितिः।
यथा नातित्याह सूत्रं शास्त्रार्थको हरः॥

तत्प्रवृत्तावप्यनिरासः संवेतृभावात् ॥३२॥

तेषां सृष्ट्यादिभावानां प्रवृत्तावपि चिद्विभुः।
स्वस्थितिं न जहात्येव सदा संवेतृभावतः॥
अनिरासोऽत्राविलोपः संवेतृत्वे विशेषणम्।
इत्थं लोको व्यवस्थानां नावस्थातुः कदाचन॥

निरूपितं स्यात्सर्वत्रानुस्यूतत्वस्वरूपतः [३३] ॥ ३२॥

एवं सुखासुखे अत्र निरूपयितुमाह च ॥

सुखासुखयोर्बहिर्मननम् ॥ ३३॥

[३४] अदिव्यविद्यास्वर्गादादिष्टप्राप्त्यादिनोदितम्।

प्रत्यगात्मनि बाह्यान्तः सुखस्य मननं मतम् ॥
दुःखं त्रिधा पञ्चधा च पुनर्भेदैरनन्तकम् ।
आध्यात्मिकादित्रितयं तावत्त्रितयमेव तत् ॥
तमो मोहो महामोहस्तामिस्रश्च चतुर्थकः ।
अन्धतामिस्र एतान्यदष्टप्रकृतिः स्थितः ।
आत्माभिमानस्तु तमो मोहो देहात्मता मतः ॥
महामोहस्तु बाह्यस्य पुत्रादेरात्मरूपता ॥
तामिस्रः स्यात्कुटुम्बाधिबाधाकर्तर्यमर्षणम् ।
पञ्चमस्त्वन्धतामिस्रो मरणत्रास एव यः ॥
अत एव विभेदेन पुनर्गच्छत्यनन्तताम् ।
चितः कर्तृधरावेशादार्थ्यात्तादात्म्यरूपतः ॥
सुखदुःखाद्यवस्थारस्य मननं यदुदित्यलम् ।
कुतश्चित्कारणात्क्वापि तदनावरकं भवेत् ॥ ३३॥
[अभिमानस्तु - अविद्या ; देहात्मता - अस्मिता ;
मोहस्तु - रागः ; बाधा - द्वेषः ;
मरणत्रासः - अभिनिवेशः ;
अनावरकं - बहिरेव यतः]

अतस्तन्मननं बाह्यमन्तर्विशति नो यदा।
तदा तन्मुक्त आत्मैव कीदृशः स्यात्तदाह च॥

तद्विमुक्तस्तु केवली ॥३४॥

ताभ्यां च सुखदुःखाभ्यां सूक्ष्मभावेन च प्रभुः।
विमुक्तः केवलः स्वस्थः सर्वानुस्यूतवृत्तितः॥ ३५

सूक्ष्मभावश्छादकः स्यान्न वा तन्निजगाद च।

मोहप्रतिसंहतस्तु कर्मात्मा ॥३५॥

३६ मोहो मौर्ख्यमनुद्योगस्त्वविद्या जाड्यमावृतिः।
अविवेकश्च मूर्छादि, पर्यायैरभिरुच्यते।
शरीरादिरहंभावो यस्मिन्सति विजृम्भते॥
प्रतिसंहृत एवात्मा व्याप्तस्तेन निरन्तरम्।
कर्मात्मा तस्य, च लोकः संसारी पशुरित्यसौ॥
तदा भेदावभासित्वमभेदाख्यातिलक्षणम्॥
[अभिरुच्यते - मौर्ख्यादिमूर्छान्तैः।
कर्मात्मा तस्य मोह एव तस्य, कार्मो मलः।]

मोहे सत्यात्मनोऽहन्तेदन्तारूपं सदा स्थितम्।
तदुद्दिष्टप्रयोगेन कर्तृभूमिसमाश्रयात्॥
प्रबुद्धः शिवरूपः स्यादात्मा नित्यं निजस्थितिः॥
भेदभाति भवत्यस्य किं तदाहात्र शंकरः॥

भेदतिरस्कारे सर्गान्तरकर्मत्वम् ॥३६॥

आत्मैव सर्वं शुद्धत्वाद्भिन्नं नेहास्ति किंचन।
१. विश्वमातृभिरेतच्च स्वसूत्रेषु निरूपितम्॥
निवृत्तस्य प्रवृत्तस्य निश्चलैव यदा स्थितिः।
विषयस्य हि शुद्धानां तत्साम्यमजमव्ययम्॥
इत्थं भेदतिरस्कारे सत्यैकाकारतात्मनः।
तेन सर्गान्तरं सृष्टेर स्वैकल्लेरव एव यः॥
तत्कर्मत्वे कर्तृता स्यात्तथास्यैव चिदात्मनः॥३६॥

अत्र हेतुं सुराधीशः प्राह सर्गान्तरं प्रति॥

करणशक्तिः स्वतोऽनुभवात्॥३७॥

शक्तिः सर्गान्तरोत्पादे सामर्थ्यं करणेषु यत्।
तत्स्वतोऽनुभवात्सिद्धमकृत्रिमबलाश्रयात्॥
यतः करणसामर्थ्यमात्मावेशबलाद्भवेत्।
तेन सत्यपथारूढो यादृशं कार्यमिच्छति॥
तादृशं प्रकरोत्येव संकल्पं परमेश्वरः।
यद्यप्युक्तमिदं सर्वं तथापि व्यक्तये पुनः॥
प्रकारान्तरमत्रोक्तं विचित्राः सिद्धयो यतः॥३७॥

एवं स्वानुभवस्तुर्यपदरूपः स्फुरत्यलम् ॥
यदा सर्वत्र सर्गादौ तदा लब्धात्मसंस्थितिः ।
भवत्यात्मा तदा ह्येव जगतां पतिरादरात् ॥

त्रिपदाद्यनुप्राणनम् ॥ ३८ ॥

संहारक्रमेण
त्रीणि जाग्रत्पदादीनि आदिभूतानि यस्य तत् ।
त्रिपदादि स्मृतं तुर्यं युगपत्पूर्णताभिधम् ॥ ३९
तेनानुप्राणनं सम्यग्भावानां स्वबलार्पणम् ॥३८॥

कथं कुर्यात्तदा ह्यत्र सूत्रं हार्दतमोहरः ॥

चित्तस्थितिवच्छरीरकरणबाह्येषु ॥ ३९ ॥

५०
चित्तस्यैकाग्रस्वरूपस्य स्थितिर्निश्चलतैव या ।
अप्रच्युतिः स्वस्वरूपादिति तच्छरीरके ॥
यथा स्वं कल्पते चात्र सबाह्याभ्यन्तरे स्थिते ।
करणग्रामे एवालं स्थितिर्या प्राणनं हि तत् ॥
एवं बाह्येषु भावेषु येषु येषु प्रकल्पनम् ।
कुरुते तेषु तेनैव प्रथनं स्यात्तथैव तत् ॥३९॥

एवमन्तःस्थितस्यैव भवेद्बाह्यविवर्धनम् ।
भावव्रातस्य कस्मात् प्रोवाच गिरिजाधवः ॥

अभिलाषाद् बहिर्गतिः संवाहस्य ॥४०॥
आत्मनः स्वबलोद्रेकात्क्रियावेशप्रकर्षणे।
यैवेच्छा सोऽभिलाषः स्यात्तस्मादयः भवत्यलम् ॥
करणादिसमूहस्य संवाहस्य बहिर्गतिः।
सव्यापारप्रवृत्तिः सा प्रेर्यस्यात्मबलेरणात् ॥
अपभिलषितव्यं यत्संवाह्यं तदुदाहृतम्।
पतेरव? काकाक्षिन्यायतस्तूक्तं पशोरेव पशोः पुनः ॥
सोऽयं सत्यभिलाषो यः स सर्वविषयेष्वलम्।
तस्मात्कर्मात्मनः प्रोक्ता संवाहस्य बहिर्गतिः ॥
स्वस्वरूपपरित्यागो वासौ वैषयिकव्रजः।
गतिः प्रसरणं तत्र संवाहस्य भवत्यतः ॥
विषयादिभिरेवासौ सदा संवाह्यते यदा। ४१
तदा पुरभिलाषाख्यो मोह एवास्य जृम्भते ॥

जीवसंज्ञश्च कर्मात्मा सति दुष्टे तदेवहे।
तत्क्षयादात्मनः किं स्यादथोवाच महेश्वरः ॥
तदारूढप्रमितेस्तत्क्षयाज्जीवसंक्षयः ॥४१॥
अभिलाषोद्गतौ पूर्वा कोटिर्दृष्टधरा स्मृता।
तदा तस्मिन्निवसति प्रबुद्धः परमार्थवित् ॥
यदा उद्धृधराक्रामी स्वबलोद्योगवीर्यतः।
तदासौ रूढविज्ञानः प्रमाता बुद्ध उच्यते ॥
प्रमातुः प्रमितिस्तस्य स्वसंविज्ज्ञानमेव यत्।
तदात्यारूढप्रमितेरभिलाषक्षयो भवेत् ॥

तत्क्षयाज्जीवसंज्ञस्य क्षयः कर्मात्मनः स्मृतः ॥ [४२]

जीवसंज्ञः स्मृतो बध्यः संसारी पशुरित्यतः ॥
पाशराशिक्षतौ सत्यं कीदृगात्मा तदाह च ।

भूतकञ्चुकी तदा विमुक्तो भूयः
पतिसमः परः ॥ ४२॥

महाभूतानि पञ्चैव पाशरूपाणि कञ्चुकम् ।
कञ्चुकं चावृतिर्ज्ञेया तदासौ भूतकञ्चुकी ॥
अविमुक्तो बद्ध एव भूयः प्रोक्तरीतितः ।
सर्वज्ञसर्वकृद्भूमिकाढ्यो पतिसमः परः ॥

स्यादसौ नात्र संदेहः सम्यक् स्वानुभवोदितम् ॥ [४३]

भूतकञ्चुकिनश्चास्य संबन्धः प्राणसंज्ञकः ॥
स कथं प्राह भगवानत्र सूत्रं वृषाकपिः ।

नैसर्गिकः प्राणसंबन्धः ॥४३॥

स च भूतशरीरस्य प्राणसंबन्ध एव यः ।
निसर्गसिद्धोऽसौ ज्ञेयः प्राणः प्राणमयो यतः ॥ [४४]

बिन्दुनादात्मकस्यास्य मार्गत्रयविसर्पिणः।
जयः कार्यो न वा कार्यः स्वसिद्ध्यै प्राह चात्र तत् ॥

नासिकान्तर्मध्यसंस्थमास्ति किमत्र
सव्यापसव्यसौषुम्नेषु ॥४४॥

नासान्तर्हृदशान्तः स्यात्तत्र संस्थस्तच्चेतसाग्रा
नियमात्तज्जयः सिद्धस्ततः स्वात्मस्थितिः स्फुरम् ॥
मध्यं हृदयमेवात्र तत्र प्राणनिरासतः
चेतसो लीनवृत्तित्वाद्भवत्यात्मोदयः परः।
एवं प्राणजये सिद्धे स्यात्किमत्र प्रयोजनम्।
वामदक्षिणसौषुम्नमार्गेषु प्राणवाहिषु ॥

यस्मात्प्राणः प्राणसमः समर्थः सर्वसिद्धिदः।
तस्मात्स्वच्छन्दतन्त्रान्तर्गीतिमेतन्निद्धेन तु ॥
प्राणः प्राणमयः प्राणो विसर्गापूरणं प्रति।
प्राणनाडीजयश्चैव ह्यानुषङ्गिक ईरितः ॥४५
यस्माच्चिन्मयः शुद्ध आत्मा स्वच्छन्द इत्यतः।

एवमस्मिन्प्रकरणत्रयेऽप्य विभुनोदितः ॥
उपायघट्टनाबन्धस्तत्र सिद्धान्तमाह च।

भूयः स्यात्प्रतिमीलनम् ॥४५॥
इत्थमुन्मेषरूपेदं जगदिच्छाविजृम्भितम् ।
सर्वं निमीलते मायाशक्तिवीर्यादणुः पृथक् ॥
आत्मानं बुबुधे भूयः श्रीकरीत्युपदेशतः ।
कालुष्यप्रक्षयेण स्यात्प्रतिमीलनमीश्वरे ॥
अद्वयभावमापन्नो यदसौ परमेश्वरे ।
तदसौ परिपूर्णैकघनानन्दः शिवो भवेत् ॥४६॥
इति संक्षेपतः सम्यक् सूत्रवार्तिकमुत्तमम् ।
शतत्रयेण श्लोकानां नवत्या चोपवर्णितम् ॥

इति प्रकरणत्रयं सुघटमीषदुन्मीलितं
मया शिवमुखोद्गतं सुमतिसिद्धये सांप्रतम् ।
निचार्य गतमत्सरैर्बुधजनैर्गुणग्राहिभिः
सुसेव्यमिदं तेऽन्वहं भवतु सिद्धिमोक्षप्रदम् ॥

इति काश्मीरिक-श्रीमदाचार्यभट्टदिवाकरात्मज-
भट्टश्रीभास्कर-विरचिते शिवसूत्रवार्तिके
विभूतिस्पन्दाख्यस्तृतीयः प्रकाशः ॥३॥
समाप्तश्चायं शिवसूत्रवार्तिकाख्यो ग्रन्थः ॥
श्रीशिवार्पणं भूयात् ॥